ISSN :- 0974 - 8946

अनुसन्धान-प्रकाशन-विभागीया

त्रैमासिकी शोध-पत्रिका

शोध-प्रभा

३४ वर्षे द्वितीयोऽङ्कः (अप्रैलमासाङ्कः) २००९ ई०

प्रधानसम्पादकः
प्रो० वाचस्पति उपाध्यायः
कुलपतिः

सम्पादकः
प्रो० रमेशकुमारपाण्डेयः

प्रकाशन-स्थलम्
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालयः)
नवदेहली-११००१६

प्रकाशकः

कुलपतिः,

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्

(मानित-विश्वविद्यालयः)

कुतुब इन्स्टीट्यूशनल एरिया,

नवदेहली-११००१६

ISSN :- 0974 - 8946

३४ वर्षे द्वितीयोऽङ्कः (अप्रैलमासाङ्कः) २००९ ई०

मुद्रकः

अमरप्रिंटिंगप्रैसः

दिल्ली-११०००९

दूरभाषा : ९८७१६९९५६५, ९८९१७०९२१७

प्रधानसम्पादकः
प्रो० वाचस्पति उपाध्यायः
कुलपतिः

सम्पादकः
प्रो० रमेशकुमारपाण्डेयः

सम्पादकमण्डलम्
प्रो० (श्रीमती) अमिता शर्मा
प्रो० जयकान्तसिंहशर्मा

मुद्रणसहायकः
डॉ० ज्ञानधरपाठकः

शोध-प्रभा

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य
अनुसन्धान-प्रकाशन-विभागीया पत्रिका

१. एषा त्रैमासिकी शोध-पत्रिका।

२. अस्याः प्रकाशनं प्रतिवर्षं जनवरी-अप्रैल-जुलाई-अक्टूबरमासेषु भवति।

३. अस्याः प्रधानमुद्देश्यं संस्कृतज्ञेषु स्वोपज्ञानुसन्धान-प्रवृत्तेरुद्बोधनं प्रोत्साहनं विविधदृष्ट्याऽनु-सन्धेयविषयाणां प्रकाशनं च विद्यते।

४. अस्यां श्रीलालबहादुरशास्त्री-राष्ट्रियसंस्कृतविद्यापीठस्थानामन्येषां च विदुषां स्वोपज्ञविचारपूर्णा अनुसन्धानप्रधाननिबन्धाः प्रकाश्यन्ते।

५. अप्रकाशितानां दुर्लभानां प्राचीनचार्यरचितानां लघुग्रन्थानां सम्पादनभावानुवादटीकाटिप्पण्यादि-पुरस्सरं प्रकाशनमप्यस्यां क्रियते।

६. प्रकाशित-निबन्धः पत्रिकायाः एक प्रतिः लेखकाय निःशुल्कं दीयते, यस्मिंस्तदीयो निबन्धः प्रकाशितो भवति।

७. अस्यां पत्रिकायां विशिष्टानां संस्कृत-हिन्द्याङ्ग्ल-ग्रन्थानां समालोचना अपि प्रकाश्यन्ते। तदर्थं द्वे प्रतिकृति प्रेषयितव्ये। आलोच्यग्रन्थस्यालोचना यस्मिन्नङ्के प्रकाशिता भवति सोऽङ्को ग्रन्थकर्त्रे निःशुल्कं दीयते किञ्च समालोचनापत्राण्यपि यथासौविध्यं दीयन्ते।

८. अस्याः वार्षिकसदस्यताराशिः १५०.०० रु० (पञ्चाशदुत्तरैकशतं रूप्यकाणि) सदस्यताराशिः कुलसचिव, श्रीलालबहादुरशास्त्री-राष्ट्रिय-संस्कृत-विद्यापीठ, नई दिल्ली-१६, इति सङ्केतेन (बैंकड्राफ्ट, पोस्टल आर्डर अथवा मनीआर्डर) द्वारा प्रेषणीयः।

९. पत्रिकासम्बन्धी सर्वविधः पत्रव्यवहारः 'सम्पादकः' 'शोध-प्रभा', श्रीलालबहादुरशास्त्री राष्ट्रिय-संस्कृतविद्यापीठ, कटवारिया सराय, नई दिल्ली-११००१६ इति सङ्केतेन विधेयः।

सम्पादकः

नैवेद्यम्

विदन्त्येव भौमाः सुमनसो यदिदं संस्कृतं न केवलं भाषा, न वै तद्गतं ज्ञानं भौतिकमेव वस्तु विज्ञाप्य विरमति, अपितु तपःस्वाध्यायसमेधितेयं काचिदनादिर्दैवी वाक् स्वसंश्रयेऽनादिकालात् संस्कृतिं परम्परां चाविरतं पुष्णन्ती विस्फुरति, विविधानवद्यविद्याभिरक्षय्यपाथेयतां भजमानां मानवजीवने शाश्वतं मूल्यमादधानात्मस्वरूपं समक्षयति प्रापयति च । स्ववैभवगरिम्णा भारतं भारतत्वेन परिचाययति। अतो राष्ट्रियसम्पदोऽस्या अधिगमो न भौतिकोन्नतये, अपितु सर्वभावेन दायित्वपुण्याधायकं स्वरूपोपलम्भकम् अमृतेनात्मसन्तर्पणम्, उपेक्षणं चास्याः संश्रुतव्रतभ्रंश इव महत्पातकं स्वात्महननमिव जघन्यं घोरे तमसि निमज्जनम्।

यथैतदीयविद्यानां तदीयभव्यभावानां न इयत्ता तथैव स्वाध्यायशीलानां संस्कृतमनीषिणां व्युत्पत्तिमता-मन्तेवासिनां च शास्त्रचिन्तनावसरे प्रतिवाक्यं न समानोऽर्थप्रकाशः। स ह्येकं वस्तु लक्ष्यीकृत्य युगपत्प्रवृत्तानामपि प्रत्यात्मनियतसंस्कारभेदाच्चित्तशुद्धितारतम्यादाहितविवेचनसामग्रीबहुश्रुततत्त्वपरिशीलन-पाटवादिभूमिकावैविध्यात् तत्त्वोन्मुखमेधासंस्फूर्तिप्रकर्ष-वैभिन्न्याच्च भिद्यते। अतश्च स्वतःसिद्धस्यापि अनुभवस्य महनीयाचार्यसन्निधौ शास्त्रनिकषोपले सत्यापनं युज्यते। कदाचिच्च भगवदनुकम्पया गहनं प्रविष्टानां ज्ञायतेऽदृष्टश्रुतपूर्ववस्तुनो बुद्ध्या संस्पर्शः। यश्च चिन्तकात्मानं चमत्कृत्य अहोभावेन पूरयति, जले तैलपातन्यायेन चित्तं विशदय्य गौरवाकुलं कुरुते, कदाचिदञ्जसैवातिटीकं रहस्यमालोकयति प्रतिभा तन्निमग्नचेतसाम्।

एकतः केचन शास्त्रमप्रविश्य अमूलमाडम्बरमिव किमपि शास्त्रमन्यथयन्तो व्यथयन्तो लक्ष्यन्ते, अपरतो मूलाग्रहेण तद्वाक्यविचारेणाप्रमत्तं जाग्रति केचन शास्त्रसंरक्षणसौविदल्लाः। तादृशानां शास्त्रचिन्तनरसिकानां मूले परिश्रान्तवतां छात्रान् विनयतां चिन्तितविषयाणां समाकलनेन यथा विद्यासमृद्धिर्न तथाऽन्यथा। दिष्ट्या तेषामेव ग्रन्थग्रन्थिविमोककुशलानां पङ्क्तिपण्डितानां यथावत् समीक्षणप्रवणानां चानवद्यप्रज्ञाप्रसूतमुपादेयधिया सङ्कलय्य तदधिजिगांसमानेभ्यो वितरीतुमियं प्रक्रमते पत्रिका शोधप्रभा।

या बहुधा विमृश्य लेखनव्रतिनां तथाविधानां प्रसादादेव स्वसङ्कल्पं पिपर्त्ति, सेयं समुपात्तलेख-सुमनोभिः सुमनसः सामोदं समर्चयितुमुपगता समुदारकटाक्षमोक्षेण सङ्कलनीयेति भावयति।

प्रो० वाचस्पति उपाध्यायः

कुलपतिः

सम्पादकीयम्

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य शोधप्रभाख्या शोधपत्रिका विविधविषयगवेषणपूर्णानां निबन्धानां संग्रहं क्रोडीकृत्य विद्योततेतराम्। अनुसन्धानसरणिसम्पन्नानामाचार्याणां शोधार्थिनाञ्च शोधपूर्ण-निबन्धान् कलेवरीकृत्य संस्कृतवाङ्मयपरिपोषणे निमग्नेयम् आनन्दसागरे निमज्जयति विदुषो नितान्तम्।

संसारेऽस्मिन् यत्किमपि ललितं सुन्दरं हृदयावर्जकं विलसति तत्सर्व भगवत्याः सरस्वत्याः विलासविजृम्भितमेव। फलतः वेदादारभ्य अद्यतनवाङ्मयं यावद् सर्वत्र भगवत्याः सरस्वत्याः महिमा वर्णितो दृश्यते। ऋग्वेदे यज्ञस्य साफल्यं कामयमानः ऋषिः सरस्वतीं स्तौति यत्-

पावका नः सरस्वती वाजेभिर्वाजिनीवती। यज्ञं वष्टु धियावसुः।। ऋ.१.३.१०

भगवत्याः वाग्देव्या अनेकानि विविधगुणद्योतकानि नामानि सन्ति। तेषु शुभ्रवर्णा, शुक्लाम्बरधरा, श्वेतहंसवाहना, श्वेतपद्मासना प्रभृतीनि नामानि सत्त्वप्राधान्यव्यञ्जनपराण्येवेति वक्तुं शक्यते। काव्यादर्शस्य मङ्गलाचरणे सरस्वतीं स्तुवन्दण्डी प्रार्थयते यत्-

चतुर्मुख-मुखाम्भोज-वनहंसवधूरिव।
मानसे रमतां नित्यं सर्वशुक्ला सरस्वती।। काव्यादर्श १.१

वीणापुस्तकमालाधारिणी निखिल-कलायाः अधिष्ठात्री देवता शास्त्राभ्यासपरायणानां मन्दमतिमतां प्रतिभाविशेषविरहितानामपि समुपासकानामवश्यमेव कल्याणं विदधाति। भगवत्याः प्रसादं विना न दृश्यते वैचक्षण्यलाभः कोऽपि। समुपासिता वागेव अव्युत्पत्तिजनितदोषच्छादयित्रीं शक्तिं वितनोति । प्रोक्तं यथा दण्डिना-

न विद्यते यद्यपि पूर्ववासना-गुणानुबन्धि प्रतिभानमद्भुतम्।
श्रुतेन यत्नेन च वागुपासिता ध्रुवं करोत्येव कमप्यनुग्रहम्।। काव्यादर्श १.१०४

एवं श्रुतेन यत्नेन चोपासिता भगवती विवेकं जनयति येन शास्त्ररहस्यं स्वत एव प्रकाशितं भासते सरस्वतीसमुपासकानां हृदि। अन्यथार्थावबोधं विना पाठमात्रपरायणाः सुधियो मण्डपस्तम्भ इव शास्त्रभारं वहन्ति। वस्तुतो विवेकवतामर्थानुसन्धायिनामेव चतुरस्रं भद्रम्। अत एव विवेकलाभाय वाग्देवता यत्नतः समुपासनीया। प्रोक्तं यथा निरुक्तकारेण-

स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्।
योऽर्थज्ञ इत्सकलं भद्रमश्नुते, नाकमेति ज्ञानविधूतपाप्मा।। निरुक्त १.१८

३४ वर्षे अङ्केस्मिन् विविधविषयविश्लेषपराः त्रयोदशलेखाः प्रकाश्यन्ते। एवं प्रतिभाविशेषोद्-भासितशोधपूर्णा संस्कृतसौरभं वितन्वतीयं विदुषां सन्तोषाय भविष्यतीति कामयमानोहं प्रमादादज्ञानाद्वा सञ्जातस्य दोषजातस्य प्रशमनार्थं निर्देशादिप्रदानैश्च उत्साहश्रियः संवर्धनार्थमभ्यर्थते सुमनसः विदुषः।

प्रो० रमेशकुमारपाण्डेयः

सम्पादकः

विषयानुक्रमणिका

संस्कृतविभागः

हिन्दी विभाग

वैदिकच्छन्दसां स्वरूपं महत्त्वञ्च

डॉ० सुन्दरनारायणझा

'छदि छादने' धातोर्निष्पन्नस्यास्य छन्दः पदस्यार्थो भवत्यावरकः। वैदिकाः लौकिकाश्च विषया एषु छन्नाः, एभिश्छादिताः वा तिष्ठन्ति तच्छन्दसां छन्दस्त्वम्।

छदिधातोरावरणार्थे वैदिकसाहित्ये अनेके प्रसङ्गाः लभ्यन्ते। यजुर्वेदीय-तैत्तिरीयसंहितानुसारेण तीव्राग्निना आवृतं प्रजापतिं प्रति गन्तुं देवाः छन्दोभिरात्मानमाच्छादितवन्तस्तस्मादेतानि छन्दांसीति ख्यातानि।

तद्यथा-''प्रजापतिरग्निमचिनुत स क्षरपविर्भूत्वा तिष्ठन्तं देवा विभ्यतो नोपयँस्ते छन्दोभिरात्मानं छादयित्वोपायन् तच्छन्दसां छन्दस्त्वम्-''[१]

शतपथब्राह्मणेऽपि छादनात् छन्दसां छन्दस्त्वं प्रतिपादितम्-''यदस्या अछादयंस्तस्माच्छन्दांसि''[२]

यास्काचार्येण निरुक्ते ईदृश्येव निरूक्तिः कृता-''छन्दांसि छादनात्''।[३] अर्थाद्यदेभिरात्मानमछादयन् देवा मृत्योर्विभ्यतः तच्छन्दसां छन्दस्त्वम्।

छान्दोग्योपनिषद्यपि प्रसङ्गोऽयमुपवर्णितः तदनुसारं मृत्योः भीताः देवाः त्रयीविद्यायां प्रविष्टाः आत्मानं छन्दोभिराच्छादयन्।

तद्यथा-''देवा वै मृत्योर्विभ्यस्त्रयीं विद्यां प्राविशन् ते छन्दोभिरच्छादयन् यदेभिरच्छादयंस्तच्छन्दसां छन्दस्त्वम्।।''[४] मन्त्रस्यास्य वर्णनं प्रस्तूयता भगवता श्रीमच्छंकराचार्यपादेन ''छन्दांसि छादनात्'' इत्युक्तेः प्रयोगः कृतः।

एवमुपर्युक्तैरुदाहरणैर्वैदिकसाहित्ये छन्दसामावरणार्थः स्फुटं स्वीकृतः। वेदे 'छन्द' इति

---

१. तै० सं० ५/६/६/१

२. श० प० ब्रा० ८/५/२

३. निरुक्तेन ७/१२

४. छां० उप० १/४/२

पदमन्येष्वप्यर्थेषु प्रयुक्तमस्ति। भगवता पाणिनिना ''बहुलं छन्दसि''[१] इति सूत्रं सूत्रयता वेदानां छन्दस्त्वं प्रकटीकृतम्।

क्वचिच्छन्दांसि रथरूपेणारोपितानि यथा–

''सोऽब्रवीत् प्रजापतिश्छन्दांसि–रथो मे भवत। युष्माभिरहमेत- मध्वानमनुसञ्चराणीति। तस्य गायत्री च जगती च पक्षौ अभवताम्। उष्णिक् च त्रिष्टुप् च प्रष्ट्यौ, अनुष्टुप् च पङ्क्तिश्च धुर्यौ। बृहत्यो वोद्धिरभवत्। स एवं रथमास्थाय एतमध्वानमनुसमचरत्।।''[२]

शतपथब्राह्मणे तु छन्दांसि देवानां पशव एवोक्तानि। यथा–

''पशवो वै देवानां छन्दांसि। तद् यथेदं पशवो युक्ता मनुष्येभ्यो वहन्ति। एवं छन्दांसि देवेभ्यो यज्ञं वहन्ति।।''[३]

यजुर्वेदे 'छन्दः' पदस्य विविधेष्वर्थेषु प्रयोग एकत्रैव पठितः। यथा–''माच्छन्दः, प्रमाच्छन्दः प्रतिमाच्छन्दो, अस्त्रीवयश्छन्दः, पङ्क्तिश्च्छन्द, उष्णिक्छन्दो, बृहतीछन्दोऽनुष्टुप् छन्दो, विराट्छन्दो, गायत्री छन्दस्त्रिष्टुप् छन्दो जगती छन्दः।''[४]

पृथिवी छन्दोऽन्तरिक्षं छन्दो, द्यौश्छन्दः, समाश्छन्दो, नक्षत्राणि छन्दो, वाक्छन्दो, मनश्छन्दः, कृषिश्छन्दो, हिरण्यं छन्दो, गौश्छन्दोऽजा छन्दोऽ श्वश्छन्दः।''[५]

''एवश्छन्दो वरिवश्छन्दः शंभूश्छन्द, परिभूश्छन्द, आच्छच्छन्दो, मनश्चछन्दो, व्यचश्छन्दः सिन्धुश्छन्दः समुद्रश्छन्दः सरिरंछन्दः ककुप् छन्दस्त्रिककुप् छन्दः काव्यं छन्दो अङ्कपं छन्दोरक्षरपङ्क्तिश्छन्दः पदंपक्तिश्छन्दो विष्टारपङ्क्तिश्छन्दः क्षुरोभ्रजश्छन्दः।''[६]

आच्छच्छन्दो प्रच्छच्छन्दः संयच्छन्दो वियच्छन्दो वृहच्छन्दो रक्षन्तरं छन्दो निकायश्छन्दो विवधश्छन्दो गिरश्छन्दो भ्रजश्छन्दः सᳫँस्तुप् छन्दोऽनुष्टुप् छन्द एवश्च्छन्दो वरिवश्छन्दो वयश्छन्दो वयस्कृतश्छन्दो वष्पर्धाश्छन्दो विशालं छन्दश्छदिश्छन्दो दूरोहणं छन्दस्तन्द्रं छन्दोऽङ्काङ्कं छन्दः।।[७]

एवमुपस्थापितेन प्रामाणिकेनोदाहरणेनेदं सिध्यति यच्छन्दः सर्वप्रथमं वेदे एव स्थितिं लेभे। अतः छन्दसः सर्वप्रथमं रूपं वैदिकमेवोपलभ्यते। वैदिकच्छन्दसां दर्शनं तु ऋषिभिः कृतम्। वेदे सामान्यानि गायत्र्युष्णिगनुष्टुप् बृहतीपङ्क्तित्रिष्टुब्जगतीति सप्रच्छन्दांसि सन्ति। तदुपरि सप्त अतिच्छन्दांसि

१. अष्टाध्याय्याम् १/४/३९
२. तैत्तिरीयसंहितायाम्
३. श० प० ब्रा० १/८/२/८
४. शु० य० सं० १४/१८
५. शु० य० सं० १४/१९
६. शु० य० सं० १५/४
७. शु० य० सं० १५/५

तथा च सप्त कृतिच्छन्दांसि। एवमुक्तप्रकारेणानेकेषां छन्दसां नामानि वेदेषु श्रूयन्ते। विविधैः विद्वद्भिः ऋक्सर्वानुक्रमणी-शुक्लयजुसर्वानुक्रमणी- वृहद्देवतादिग्रन्थेषु प्रतिमन्त्रं निर्णयः दत्त एव। तत्राक्षराणां समानत्वे सत्यपि देवतादि दर्शनात् छन्दो निर्णयः सुकरः। यथा अग्निदेवताकछन्दः गायत्रीछन्दः भवितव्यम्। इन्द्रदेवताक छन्दः त्रिष्टुब् छन्दः भविष्यम्।

वैदिकछन्दसामाधारेणैव लौकिकच्छन्दांसि प्रवर्तन्ते। परं जगतः सामान्यः धर्मोऽस्ति विकासस्तस्मात् वैदिकच्छन्दसामाधारे प्रवृत्तानि लौकिकच्छन्दांसि विविधानि विकसितरूपाणि प्राप्नुवन्। अनुष्टुबादीनि छन्दांसि लोके वेदे च समानरूपेणावर्तन्त। लौकिकच्छन्दस्सु चतुष्पादत्वमनिवार्यः धर्मः सञ्जातः। वैदिके छन्दसि त्रयः पञ्च सप्त वा पादाः अपि भवितुं शक्नुवन्ति। परं लौकिके छन्दसि चत्वार एव पादाः भवेयुरयं नियमः दृढोऽस्ति।

तस्माद्युपर्युक्तेन विवेचनेनेदं स्फुटो भवति यच्छन्दांसि हि द्विविधानि लौकिक-वैदिकभेदेन। तत्र वेदमन्त्रेषु ऋषिभिर्निर्दिष्टानि छन्दांसि वैदिकानि;, लौकिके साहित्ये पुराणेतिहासादि काव्येषु प्रयुक्तानि च्छन्दांसि लौकिकानीत्युच्यन्ते।

वेदाङ्गेषु ''छन्दः पादौ तु वेदस्य''[१] इत्युक्त्या छन्दसां स्थानं पादाङ्गत्वेनोक्तमाचार्यपाणिनिना शिक्षाशास्त्रे। छन्दोभिधेनैतेनाङ्गेन छन्दसां सर्वेषामुच्चारणविधिस्तद्गतिप्रकारस्तद्गानरीतिश्च विदिता जायन्ते। अतः वेदमन्त्राणां प्रयोगात्पूर्वं तेषां छन्दसां ज्ञानमपरिहार्यम्। अन्यथा वैदिकं कर्म निष्फलं स्यात्। कृतं कर्म दुष्फलमपि दद्यात्। सम्यक्प्रतिपादितमेतच्छान्दोग्योपनिषदि-

''यो ह वाऽविदितार्षेयच्छन्दो दैवतब्राह्मणेन मन्त्रेण याजयति वाध्यापयति वा स्थाणुं वर्च्छति गर्त्ये वा पात्यते प्रमीयते वा पापीयान् भवति।''[२]

तस्मान्मन्त्रस्य छन्दोऽवश्यं ज्ञातव्यम्। छन्दसां देवताः, वर्णाः, ऋषय अप्यत्र निर्दिष्टाः। अधोलिखिता सारिणी एतस्य प्रपञ्चस्य स्पष्टीकरणे सहायिका भविष्यति-

छन्दः	**देवता**	**गोत्रम्**	**स्वरः**	**वर्णः**
गायत्री	अग्निः	अग्निवेश्यम्	षडजः	श्वेतः
उष्णिक्	सविता	काश्यपम्	ऋषभः	सारङ्गः
अनुष्टुप्	सोमः	गौतमम्	गान्धारः	कृष्णः
बृहती	बृहस्पति	आंगिरसम्	मध्यमः	लोहितः[३]
पङ्क्तिः	मित्रावरुणौ	भारद्वाजम्[४]	पञ्चमः	नीलः[५]

---

१. पा॰ शि॰ पृ॰ ४१
२. छा॰ ब्रा॰ ३/७/५
३. छन्द : शास्त्रे पृ॰ ४० तमे नील : इत्युक्तः।
४. तत्रैव भार्गव : इत्युल्लेखः।
५. तत्रैव लोहित : इत्युल्लेखः।

त्रिष्टुप्	इन्द्रः	कौशिकम्	धैवतः	सुवर्णः
जगती	विश्वेदेवाः	वाशिष्ठम्	निषादः	गौरः

देवतागोत्रादीनामाधारेण छन्दसां निर्णयः कर्तुं शक्यते। सप्तवैदिकछन्दस्सु अक्षराणां न्यूनाधिकतया अनेके भेदाः सम्पद्यते ते अधः सारिण्यां प्रदर्श्यन्ते–

छन्दोभेदाः	**आर्षी**	**दैवी**	**आसुरी**	**प्राजापत्या**	**याजुषी**	**साम्नी**	**आर्ची**	**ब्राह्मी**
गायत्री	२४	१	१५	८	६	१२	१८	३६
उष्णिक्	२८	२	१४	१२	७	१४	२१	४२
अनुष्टुप्	३२	३	१३	१६	८	१६	२४	४८
बृहती	३६	४	१२	२०	९	१८	२७	५४
पङ्क्तिः	४०	५	११	२४	१०	२०	३०	६०
त्रिष्टुप्	४४	६	१०	२८	११	२२	३३	६६
जगती	४८	७	९	३२	१२	२४	३६	७२

उपर्युक्तऽस्मिन् कोष्ठके दैवीगायत्री एकाक्षरं छन्दः।[१] एतदभिप्रायेणैव दुर्गाचार्येण निरुक्तस्य स्ववृत्त्या ''नाच्छन्दसि वागुच्चरति इत्युल्लिखितम्, यस्याशयोऽस्ति छन्दो बिना वाणी समुच्चरिता न भवति। नाट्यशास्त्रप्रणेता भरतमुनिरपि छन्दो विरहितं शब्दं नैव स्वीकरोति–

''छन्दहीनो न शब्दोऽस्ति, न छन्दः शब्दवर्जितम्।।''[२]

वेदे प्रयुक्तेषु छन्दस्सु लघु–गुरुमात्राया अनुसरणं नैव क्रियते। केवलमक्षराणामेव गणना भवति। फलतः सर्वाण्येव वैदिकच्छन्दांसि अक्षरछन्दांसि एव सन्ति। अस्य द्वौ प्रमुखभेदौ स्तः–(१) केवलमक्षरानुसारी छन्दः (२) पादाक्षरगणनानुसारी च। प्रथमप्रकारेषु छन्दः सु केवलमक्षरगणना भवति, द्वितीय प्रकारकेषु छन्दः सु अक्षराणां पादेषु नियमतो विभाजनस्य व्यवस्था वर्त्तते।

वैदिकच्छन्दसां मुख्यभेदानां विषये मतैक्यं नास्ति। किञ्च समस्तानां वैदिकच्छन्दसां संख्या (२६) षड्विंशतिमन्यन्ते। एतेषु प्रारम्भिकानि पञ्चच्छन्दांसि वेदेऽप्रयुक्तानि सन्ति। अवशिष्टानि चैकविंशतिः संख्यकानि च्छन्दांसि त्रिसप्तकेषु विभाजितुं शक्यन्ते। प्रयुक्तेषु छन्दःसु गायत्री प्रथमं छन्दोऽस्ति। अतः प्रथमं सप्तकं गायत्र्याः छन्दसः प्रारभ्यते। अस्मात्पूर्ववर्त्तीनि पञ्चच्छन्दांसि ''गायत्रीपूर्वपञ्चकम्'' इति नाम्ना ख्यातानि सन्ति। तानि यथा–

---

१. निरुक्ते दुर्गवृत्तौ ७/२

२. नाट्यशास्त्रे १५/४२

माच्छन्दः (चतुक्षराणि), प्रमाच्छन्दः (अष्टौ अक्षराणि), प्रतिमाच्छन्दः (द्वादशाक्षराणि), उपमाच्छन्दः (षोडशाक्षराणि), समाच्छन्दः (त्रिंशदक्षराणि) (क) प्रथमसप्तकस्य सप्तच्छन्दसां नामानि सर्वत्र तुल्यान्येव सन्ति। एतेषां नामानि सन्ति–(१) गायत्री (२४ अक्षर), (२) उष्णिक् (१८ अक्षर), (३) अनुष्टुप् (३२ अक्षर), (४) बृहती (३६ अक्षर), (५) पङ्क्तिः (४० अक्षर), त्रिष्टुप् (४४ अक्षर), तथा जगती (४४ अक्षराणि)।

(ख) द्वितीयसप्तकस्य सपृच्छन्दांसि 'अतिच्छन्दः' इति नाम्ना ख्यातानि सन्ति।

अस्याक्षरसंख्या पूर्वापेक्षया चतस्रोऽधिका वर्त्तते। यथा– (१) अतिजगती (५२ अक्ष०), (२) शक्वरी (५६अ०), (३)अतिशक्वरी (६०अ०), (४) अष्टिः (६४ अ०), (५) अत्यष्टिः (६८ अ०), (६) धृतिः (७ अ०), (७) अतिधृतिश्च (७६ अक्षराणि)।

(ग) तृतीयसप्तकस्य सप्तच्छन्दसां नामानि–

(१) कृतिः (८० अ०), (२) प्रकृतिः (८४ अ०), (३) आकृतिः (८८ अ॰), (४) विकृतिः (९२ अ॰), (५) संस्कृतिः (९६ अ॰), (६) अभिकृतिः ((१०० अ०), (७) उत्कृति श्च (१०४ अ०), इति पिङ्गलछन्दः शास्त्रानुसारम्।

वस्तुतः वैदिकेषु छन्दः सु एकस्यैव छन्दसः एकस्मिन् स्थाने भिन्संख्याकान्यराणि अपरत्र च भिन्नसंख्याकान्यक्षराणि दृश्यन्ते। अयं खलु प्रथमः क्लेशः। यथा गायत्रीछन्दः कुत्रचिद् चतुर्विंशत्यक्षरमत् दृश्यते अन्यत्र त्रयोविंशत्यक्षरमत्, अपरत्र तु एकविंशत्यक्षराण्येव दृश्यन्ते। यथा–

''त्वमग्ने यज्ञानां। होता विश्वेषां हितः।। देवेभिर्मानुषे जने।।[1]

मन्त्रेऽस्मिन् प्रथमे पादे षडक्षराणि, द्वितीये पादे सप्ताक्षराणि, तृतीये पादे च अष्टौ अक्षराणि सन्ति। त्रयः पादास्तु सन्ति परं त्रिषु पादेषु समानाक्षर व्यवस्था न दृश्यते।

यद्यपि छन्दः स्वरूपज्ञाने अक्षरसंख्याज्ञानं पूर्णतया तिरस्कर्तुं न शक्यते। तथापि अयमेव पादाक्षरगणनया छन्दोऽक्षरगणनायाः नियमः यदि छन्दोज्ञाने अन्तिमं वचनं स्यात् तदा क्लेशः स्यात्।

क्वचित् गायत्रीछन्दसः चतुर्विंशत्यक्षराणि त्रिषुं पादेषु विभक्तानि दृश्यन्ते क्वचित्तु एतान्येवाक्षराणि चतुर्षु पादेषु विभक्तान्युपलभ्यन्ते। तदापि तत्र गायत्री छन्द एव। यथा–

''अग्निमीले पुरोहितं। यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्।।''[2]

अस्मिन् मन्त्रे चतुर्विंशत्यक्षराणि त्रिषु पादेषु विभक्तानि

---

१. साम सं॰ १/२

२. ऋग्वेदे १/१/१

३. अथर्व सं॰ ६/१

परं–‘‘दोषो गाय वृहत्। गाय द्युमद्धेहि।।

आथर्वण स्तुहि। देवं सवितारम्।।’’[३]

अत्र प्रतिपादं षडक्षराणि सन्ति। इत्थं गायत्र्यां चतुर्विंशत्यक्षराणि भवितव्यानि एवेति सिद्ध्यति। भवन्तु नाम तत्र भिन्न संख्याक्षर पादा अपि। यथा–

‘‘अग्ने तमद्याश्वं न स्तोमैः। क्रतं न भद्रं हृदिस्पृशम्।

ऋद्ध्यामा त ओहैः।।’’[१]

अत्र प्रथमे द्वितीये च पादे नव–नवाक्षराणि सन्ति तृतीये पादे षडक्षराणि। इत्थं (९+९+६=२४) चतुर्विंशत्यक्षराणि जायन्ते। तस्माद्यत्र यत्र त्रयः गायत्राः पादाः तत्र गायत्री छन्दः इति पिङ्गलछन्दः शास्त्रस्य ‘‘गायत्र्या वसवः’’[२] (२) इत्यनेन सूत्रेण सिद्ध्यति। यत्र च पुनश्चत्वारः गायत्राः पादास्तत्र अनुष्टुप् छन्दः ‘‘अनुष्टुब् गायत्रैः’’[३] (३) इत्यनेन पिङ्गलछन्दः सूत्रेण सिद्ध्यति। अर्थात् चतुर्भिः अष्टाक्षरवखिः गायत्रैः पादैः अनुष्टुप् गायत्री छन्दो भवति।

एवमेवान्येषु छन्दस्स्वपि ज्ञातव्यभेव। परमत्राल्पकालसाध्ये लघुशोधपत्रे समेषामपि छन्दसां विस्तृतं विवेचनमसम्भवमेव। तस्मादत्रैव विरम्यतेत्यलमतिविस्तरेण।

---

१. ऋ॰ सं॰ ४/१०/१ यजु॰ सं॰ १५/४४ ; १७/७७

२. पि॰ छ॰ सू॰ ३/३

३. पि॰ ध॰ सू॰ २/२३

भारतीयदर्शनेषु सृष्टिः

डॉ. महेशप्रसादसिलोड़ी

सृष्टिस्थितिविनाशानां शक्तिभूते सनातनि।
गुणाश्रये गुणमये नारायणि नमोस्तुते।।

सर्वेष्वपि भारतीयदर्शनेषु सृष्टिस्वरूपं प्रतिपादितम्। परम्प्रत्येकं दर्शनन्तत्र स्वातन्त्र्यम्भजते। तस्मिन् स्वातन्त्र्ये किं बीजम्परस्परञ्च किमप्यैक्यं वर्तते वा नैव। कियत्यंशे मतैक्यमस्ति किमत्यंशे च परस्परं वैमत्यमस्ति प्रतिभाति वेति समग्रोऽपि विचारः सर्वथा समपेक्ष्यते। अत एवाऽत्र मया चार्वाकदर्शनतः समारभ्य वेदान्तदर्शनं यावत् सर्वाण्यपि–दर्शनानि सृष्टिक्रमः कथं विचारयन्ति इति अस्मिन् लघुशोधपत्रे प्रस्तोतुं प्रयत्नो विहितः।

चार्वाकदर्शने सृष्टिः –

चार्वाकदर्शने सृष्टेरुत्पादने पृथिवीजलतेजोवायु–चत्वारि भूतान्यभिमतानि।[१] एतेषाञ्चतूर्णाम्भूतानामुचित-मात्रायां संयोगे सति स्वयञ्चैतन्यमुत्पद्यते।[२] यथा मादकोपकरणानां यथोचितम्परिमाणे एकत्रीकरणे तथा पूर्णपरिपाके सति मादकता।[३]

महर्षियाज्ञवल्क्यो निजपत्नीं प्रति जगदुत्पत्तिलयक्रियाविषये उपदिशन्नकथयत्–एतेषाञ्चतूर्णाम्भूताना-मेव सम्मिश्रणेन ज्ञानोदयस्तथा मृत्योरनन्तरं ज्ञानस्यास्तित्वं विनश्यति। चार्वाकदार्शनिकसम्प्रदाये मुख्यरूपेऽस्यैव सिद्धान्तस्याधिमान्यता स्वीकृता। चार्वाकदर्शनमते कण्टकानान्तैक्ष्ण्यम्, पक्षिणां विभिन्नवर्णानि, यथा हंसस्य-शुक्लवर्णम्, शुकानां हरित्वम्, विचित्रवर्णत्वं सर्वं स्वभावतः।[४] जगतोऽस्य कोऽपि नियन्त्रको न। किमपि दृष्टकारणमस्य नोपलब्धम्। इदं सर्वं स्वाभाविकम्। नात्र कोऽपि प्रयतते। नेदङ्कस्यचिदधीनम्।

स्थितिविषये चार्वाकदर्शनेन न किमपि वर्णितम्। अत्र सृष्टिलययोः कारणं स्वाभाविकम्। अतः स्थितिरपि स्वाभाविकी मन्तव्या। सांख्यदर्शनेऽपि विज्ञानभिक्षुणा स्थितिविषये विचारयितुं यत्नो न विहितः। तत्र सृष्टेरनन्तरम्प्रलयो भवति। प्रकृतेः साम्यावस्थैव प्रलयः, विषमावस्थैव सृष्टिः। एतदर्थं सृष्टिप्रलयमध्ये यः कालस्तदेव स्थितिकालः प्रोक्तः।[५]

---

१. पृथिव्यप्तेजोवायुरिति तत्त्वानि। बार्हस्पत्यसूत्रम्–२

२. तेभ्यश्चैतन्यम्। बार्हस्पत्यसूत्रम्–३

३. किण्वादिभ्यो मदशक्तिवत्। बार्हस्पत्यसूत्रम्–४

४. कः कण्टकानां प्रकरोति तैक्ष्ण्यं विचित्रभावं मृगपक्षिणां च।
स्वभावतः सर्वमिदं प्रवृत्तं न कामचारोऽस्ति कृतः प्रयत्नः।। बुद्धचरितम् १–१२

चार्वाकदर्शनमते जगतो लयकारणमपि स्वभावमेव।[१] अस्य कोऽपि कर्त्ता, हर्त्ता, भर्त्ता च नैव। धर्मेण न नर सुखी न चाधर्मेण दुःखी भवति। जगतः कार्यकारणभावान्नापित्वत्र स्वभावमेव कारणम्।[२] पृथिव्यादिचतुर्भूतानां संयोगे चैतन्यमुपजायते, परमेतेषां विनाशे तच्चैतन्यं विनश्यति।[३]

साररूपेण तस्मिन् मते जगदुत्पत्तेर्मूलकारणं स्वभावस्तथास्थितेः कारणमपि। जगतो विविधतायाः विचित्रतायाः कारणन्तदेव। अस्य विलयस्य मूलकारणमपि स्वभावमेव ज्ञातव्यमिति।

जैनदर्शने सृष्टिः –

सांसारिकजीवान् पुद्गलांश्च प्रभावितकरणशीलैः संयोगवियोगैरस्याः सृष्टेमहाचक्रं स्वयञ्चलति। अत एव कस्यचिन्नियन्त्रकस्य, व्यवस्थापकस्य, सुनियोजकस्य, निर्देशकस्य चावश्यकता नास्ति। भौक्तिकजगतश्चेतनजगत्स्वयन्निजबलाबलानुसारेण निर्देशकः प्रभावकश्च भवति। पुनरिदमावश्यकमपि न यत्प्रतिभौक्तिकपरिणमनाय कस्यचिच्चेतनाधिष्ठातुं र्नितान्तावश्यकता स्यात्।

चेतनाधिष्ठातारं विनाप्यसंख्यभौतिकपरिवर्तनानि स्वयमेवकारणसमाग्रयानुसारेण भवति। अतो जगदिदं स्वयं सिद्धमनादि चोच्यते। संसारमिदमनादि बीजवृक्षवत्।

दृश्यजगत्परमाणुरूपद्रव्याणाम्मात्रमालोपन्नम् अपित्वनन्तपुद्गलसम्भूतस्कन्धानाम्पुञ्जम्। प्रति स्कन्धान्तर्गत परमाणुषु परस्परमेतावत्प्रभावकरासायनिकसम्बन्धोऽस्ति यत्सर्वेषां निजस्वतन्त्रपरिणमनभवेदपि तेषाम्परिणमनेषु एतावत्सादृश्यम्भवति यत्प्रतीयते यथैषाम्पृथक् सत्तासीदेव न।[४] एकस्मिन्नाम्रफलरूपस्कन्धे सम्बद्धपरमाणुरमुककालं यावत्सदृशम्परिणमनङ्कुर्वन्तमपि परिपाककाले क्वचिद् मधुरतिक्तकषाय हरितपीतरक्तानि गन्धिनः कोमलदृढादिपरिणमनानि कुर्वन्ति साक्षाद् दृश्यन्ते, किन्तु तेऽसंख्यपुदगलानां विशिष्टयुक्ताः पिण्डा एव। यदा परमाणवः कस्मिश्चित् स्कन्धे सम्मिलन्ति तदापि तेषां व्यक्तिशः परिणमनन्न रुणद्धि, तत्तु अविरामगत्या याति।

जैनदर्शनानुसारेण कस्यचिदभावस्यार्थात्सतः पूर्णनाशो न भवति। सर्वपदार्थाः निजगुणपर्यायरूपा-भ्यामुत्पादव्ययङ्कुर्वन्ति एव। विश्वेस्मिन्ननन्तचेतनानि, अनन्तपुदगलाणवः, एक आकाशः, एकन्धर्मद्रव्यम्, एकमधर्मद्रव्यम्, असंख्यकालाणवो द्रव्याणि, यावनि व्योम्निदेशे एतानि जीवद्रव्याणि स्थितानि स लोक उच्यते।

---

१. अपरे लोकायतिकाः स्वभावं जगतः कारणमाहुः।
स्वभावादेव जगत् विचित्रमुत्पद्यते, स्वभावतो विलयं याति।
(भट्टोत्पल-वृहत्संहिता १-७ टीका)।

२. न स्वर्गो नैव जन्मान्यदपि च नरको नाप्यधर्मो न धर्मः,
कर्त्ता नैवास्य कश्चित्प्रभवति जगतो नैव भर्त्ता न हर्त्ता।
(चिरञ्जीव भट्टाचार्यः विद्वन्मोदतरङ्गिणी)

३. विनिष्टेषु सत्सु स्वयं विनश्यति। (सर्वदर्शनसंग्रह पृ. ४)

४. अणवः स्कन्धाश्च - तत्त्वार्थसूत्रम् ५-२५

परमाणूनाम्प्रकाराः –

सतः परिणामा द्विधा, एकस्स्वभावात्मकः, द्वितीयो विभावरूपः धर्मद्रब्याणि, अधर्मद्रब्याणि, आकाशद्रब्याणि असंख्यकालाणुद्रब्याणि एतानि सदा शुद्धस्वभावरूपेण परिणमन्ति। एतेषु पूर्वपर्याया विनष्टा भूत्वापि या नूतनोत्तरपर्यायउत्पद्यते सा स्वभावात्मिकैव भवति। प्रत्येकन्द्रब्ये एको गुरुलघु-गुणशक्तिर्वास्ति, यस्मात्कारणाद् द्रव्यस्य समतुला स्थिता। तन्न गुरुर्न लघुः।

एष नियतो यज्ञगति यति सन्तस्तेषु कश्चिन्नवसदुत्पन्नो भवितुन्नार्हति न च विद्यमान सतस्समूलविनाश एव। ते सन्तः अनन्तचेतनाऽनन्तपुदगलाणवः, एक आकाशः, एकन्धर्मद्रब्यम्, एकमधर्मद्रब्यम्, असंख्यानि कालद्रव्याणि च, एतेषां संख्यायान्नत्वेकस्य वृद्धिभवितुं शक्यते न चैकस्य हानिरेव। इत्थं जैनदर्शमधिकृत्य साररूपेणात्र सृष्टिक्रमः प्रतिपादितः।

बौद्धदर्शने सृष्टिः

अस्य संसारस्य निर्माणं यथार्थमेव पदार्थनिष्ठम्। बुद्धस्य प्रधानप्रवृत्तिः विश्वमेकस्मिन् सततप्रवाहरूपे प्रस्तुतीकरणम्प्रति वर्तते। यः "निस्सत्त" अर्थात् आत्मन्यसत एव "निज्जीवः" अर्थादात्मविहीनः। तत्थकिञ्चिद् "धम्म" अभिप्रायोऽवस्थानां वर्गकरणमात्रम्। अयमयथार्थस्तु परन्नासत्। तथापि प्राचीन बौद्धदर्शने एतादृशानि वाक्यानि उपलभ्यन्ते, यानि संसारस्यैकविशुद्धविषयी विज्ञानपरकव्याख्या समर्थयन्ति। पदार्थैः पूर्णसंसारो जीवात्मरूपा विषयाः नियन्त्रितः अयमस्माकं सर्वेषामाभ्यान्तरः। अहं युष्मान् ब्रवीभि, यदिदं शरीरेमेव। यत्तु मर्त्यञ्चतुर्हस्तपर्यन्दीर्घम्परं स चेतो बुद्धिसम्पन्न च। अस्य शरीरस्य वृद्धिह्रासौ चैवं सा प्रक्रियैव या शरीरमवसानम्प्रत्यग्रसरति वस्तुतो जगत्।

माध्यमिकसूत्राणाम्पञ्चमाऽध्याये कार्यकारणसम्बन्धानाञ्खण्डनङ्कृतम्, कोऽपि पदार्थो निजकारणाद्रूपे प्रत्यक्षस्य विषयो न भवति, पदार्थस्य च कारणमपि स्वयम्पदार्थात् पृथग् रूपेण न गृह्यते, यदि पदार्थस्य च कारणं स्वयं पदार्थात् पृथक् तदास्य तात्पर्यमेतदभवद् यद् भवान् पदार्थान् कारणविहीनान् मन्यते। किन्तु पदार्थकारणं स्वीकरणं युक्तियुक्तन्न, यतः कारणं विना पदार्थस्यास्तित्वन्न स्थातुं शक्यते।

नागार्जुनस्तर्कयति यत् कारणात् पृथक् कार्यमथवा कार्यात् पृथक् कारणमभवात्मकं वर्तते, कस्यचिदपि वस्तुन उत्पतिर्न तु स्वात्मनो भवति नैव चान्यपदार्थेभ्यः। कार्यं कारणं विनापि न भवति। तर्क दृष्ट्योत्पत्तिरसम्भवा प्रतीयते।[१]

परमार्थदृष्ट्या पश्येमश्चेतर्हि न तु किमपि कारणन्न कार्यमेवाऽस्ति, नोत्पत्तिर्न विनाशः।[२] कदाचित् कारणमेव समस्तसामग्री मन्यते, तदपि सर्वविधनियन्त्रणरहिता एतादृश च यत् अवगमनं जटिलमस्ति।[३]

---

१. सर्वसिद्धान्तसंग्रहः - अ० ४-७

२. सर्वसिद्धान्तसंग्रहः - अ० २१

३. सर्वसिद्धान्तसंग्रहः - अ० २०

अनेन विवादेन परिपाकोऽयम्निःसरति यत् परिवर्तनस्य विचारो बुद्धिगम्य नास्ति "ककारे" "खकारे" परिवर्तते, नागार्जुनस्तर्कयति यद् "ककारः" "खकारः" भवितुं शक्यते तर्ह्ययं सदैव स्थितो भविष्यति, अन्यथा अयं "खकारः" नैव भवितुं शक्यते। परं स "खकारः" रूपेण नाभविष्यत्। यतो हि अन्यथास्य कथनस्य काचिदावश्यकतैव। अत एव इयं परिवर्तनप्रक्रिया बुद्धिगम्या नास्ति।

समस्तधर्माः वस्तूनि वा तेषाङ्गुणचेतनाया घटकावयवाः अस्माकं चेतना निजख्यातिः, प्रत्यक्षज्ञानं वा, वस्तुप्रतिविकल्पमथवा तस्य व्याख्यया आनुभाविको जगतो विकासङ्करोति। योगाचाराः चेतनाक्रियाशीलतायाः कारणन्तस्याभ्यन्तरे कार्यङ्करोति। अनादिकालादवर्तमानसहजप्रवृत्तिः कथयन्ति।

न्यायवैशेषिकमनुसृत्य सृष्टिः

नैयायिका वैशेषिकाश्च पृथिवीजलतेजोवायूनाञ्चतुर्णान्द्रव्याणाम्परमाणून् प्रलयकाले स्थिराणि अमन्यत। यत एतानि नित्यानि, आकाशकालदिगात्मामनांसि पञ्चद्रव्याणि तु नित्यानि सन्त्येव, अत एतान्यपि प्रलयकाले सर्वदा एव तिष्ठन्ति। अस्यार्थोऽयमभवद् यत्प्रलये एतेषाम्मतानुसारेण पृथिव्यादि नवद्रव्याणि विद्यमानानि सन्ति। आकाशकालादीनि तु पूर्णरूपेण तत्र सन्ति तथा पृथिव्यादीनि चत्वारि अन्यानि द्रव्याणि निजसूक्ष्मरूपे वर्तमानानि। अत एवैतेषामत्र प्रलयानन्तरं सृष्टिम्भवितुङ्कीदृश्यमपि बाधा भवितुन्न शक्यते।

जगदिदमनाद्यनन्तम्। अस्य चेतनाचेतन जातः कतिवारं रचनामवल्लयश्चेति न ज्ञायते। इदम्भूयोभूयः प्रवाहात्मकरूपेण संसरति, अतः कालान्तरेऽस्मादनादेर्जगतो मुक्तिं लब्धुमभिलाषा ब्रह्मणे भवति।

आत्मनोऽणूनाञ्च संयोगेषु वायवीयपरमाणुषु क्रियोत्पद्यते। अस्याः क्रियायाः समवायिकारणानि वायोः परमाणवः असमवायिकारणानि वृत्तिलब्धादृष्टेनयुतात्मा परमाणूनाञ्च संयोगः, एवमदृष्टनिमित्तकारणानि। एवम्परमाणुषु क्रियोत्पत्तौ भूतायामेतेषु वायवीयपरमाणुषु पुनस्संयोगानामुत्पत्तिर्जायते, एतेभ्यस्संयोगेभ्यो द्वयणुकादिक्रमेण जलमहानिधिरुत्पन्नो भूत्वा कस्माच्चिदवाधितत्वात् सर्वत्र प्लावित तिष्ठति।[१] जलनिधौ उत्पन्ने सति जलस्य तस्मिन् महासमुद्रे पार्थिव परमाणुभ्यः कटुस्वभावशीला महापृथिवी उत्पन्ना भूत्वा स्थिता तिष्ठति,[२] तदनन्तरन्तस्मिन् जलनिधौ तैजसपरमाणुभ्यो द्वयणुकादिक्रमेण महतस्तेजससमूहः कस्माच्चिदनमिभूतत्वादतिशयदीप्तियुतम्भूत्वा तिष्ठति।[३] यद्यपि जलतेजयोरेतयोर्द्वयोर्मध्ये स्वभावतो विरोधस्तथापि जीवनामदृष्टेन तयोरप्याधाराधेयभावो भवति।

---

१. तपः पुनः प्राणिनां भोगभूतये महेश्वरसिसृक्षानन्तरं सर्वात्मवृत्तिलब्धादृष्टापक्षेभ्यस्ततसंयोगेभ्यः पवनपरमाणुषु कर्म्मोत्पत्तौ तेषां परस्परसंयोगेभ्यो द्वयणुकादिक्रमेण महान् वायुः समुत्पन्नो नभसि दोधूयमानस्तिष्ठति। (प्रशस्तपादभाष्यम्)

२. तदनन्तरं तस्मिन्नेव पार्थिवेभ्यः परमाणुभ्यो महापृथिवी संहतावतिष्ठते। (प्रशस्तपाद)

३. तदनन्तरं तस्मिन्नेव महादधो तैजसेभ्योऽणुभ्यो द्वयणुकादि प्रक्रमेणोत्पन्नो महाँस्तेजोराशिः केनचिदनभि भूतत्वाद्देदीप्यमानतिष्ठति। (प्रशस्तपादभाष्यम्)

महाभूतादेः सृष्टेः प्रयोजकेश्वरीयेच्छायै प्रयत्नापि शरीरावश्यकता भविष्यति समाधानो इच्छाप्रयत्ने यत्रागन्तुकगुणौस्तस्तत्र शरीस्यावश्यकता काममेव भवेत्तत्रैतौ द्वावेव स्वाभाविक गुणौ स्तः। तत्र शरीरापेक्षा वृथा, बुद्धि इच्छा प्रयत्न चैतेषां सर्वेषान्नित्यत्वमपि युक्तिविरुद्धन्न। यतो ह्याश्रयभेदेन रूपादीनाङ्गुणानान्नित्वमानित्वञ्च द्विधा गतिर्दृश्यते। अतो बुद्ध्यादयोऽपि जीवेश्वररूपाश्रयाणाम्भेदेन नित्यानित्याश्च द्विधा भविष्यन्ति। आस्तिकान्नास्तिकानाञ्च तावत्त्य एव युक्तयो वर्त्तन्ते।[१]

जीवानामध्यक्षतायाङ्केवलम्परमाणव एव, पृथिव्यादीनाम्महाभूतानां सृष्टिङ्करोति। एतेषां ज्ञानान्निजकर्मभिरुपार्जितेन्द्रियाणामधीनां वर्तते, अतो महाभूतानां सृष्टौ अपेक्षित सर्वविषयाणां ज्ञानं जीवेषु असम्भवम्। शंकास्ति यज्जीवेष्वपि सर्वविषयेषु व्याप्त चैतनस्य सत्ता स्वस्त्येव? समाधानस्तर्हि पुनश्शरीरयुक्तजीवेषु तस्य सहज चेतनस्य विघटनङ्करोति, येन यत्सर्वविषयानदृष्टवस्तूनामिव पश्यति। वैशेषिक दृष्ट्या जीवात्मपरमात्मनोः संयोगेनोत्पन्नपरमाणूनाङ्क्रियाभिः क्रिया क्रियतो विभागो विभागात्पूर्व संयोगनाशस्तत उत्तर संयोगः। अर्थात्प्रथमक्षणे क्रिया भवति, द्वितीयक्षणे क्रियाश्रयाव विभज्यन्ते। तृतीयक्षणे पूर्वसंयोगा विनश्य, चतुर्थक्षणे उत्तरदेशे क्रियासंयोगो भवतीति।[२] इत्थं साररुपेण सृष्टिः प्रतिपादिता।

सांख्ययोगयोः सृष्टिः

प्रकृतिपुरुषयोः संयोगादेव सृष्टिर्भवति। यथान्धस्कन्धमारुह्य पङ्गुः स्वाभीष्टं स्थानमधिगच्छति, अन्धश्च पङ्गुनेत्रनिर्दिष्टपथा तेन सहैव स्वेष्टं स्थानम्। अयं संयोगो महदादिसृष्टिं विना पुरुषस्य भोगाय कैवल्याय च समर्थो भवितुन्नार्हति, अतः प्रकृतिपुरुषयोः संयोग एव भोगापवर्गाय सृष्टिङ्करोति।[३]

सत्त्वरजस्तमसा[४] साम्यावस्था प्रकृतिः, प्रकृतेर्महान् महतोऽहङ्कारोऽहंकारात् पञ्चतन्मात्राणि एकादशेन्द्रियाणि च। पञ्चतन्मात्रेभ्यः पञ्चमहाभूतानि प्रादुर्भूतानि। कथनस्याभिप्रायश्शब्दतन्मात्रतश्शब्दगुणिन आकाशस्योत्पत्तिः। शब्दतन्मात्रसहितात् स्पर्शतन्मात्राद् वायोरूत्पत्तिः। यश्च गुणश्शब्दस्पर्शश्चास्ति। रूपतन्मात्रतश्शब्दस्पर्शरूपगुणा विद्यन्ते। रसतन्मात्रतश्शब्दस्पर्शरूपतन्मात्राणां सहयोगेन जलमुत्पद्यते। यस्मिन् शब्दस्पर्शरूपरसगुणा विद्यन्ते। गन्धतन्मात्रतश्शब्दस्पर्शरूपरसतन्मात्राणां सहयोगेन पृथिवी जायते, यस्यां शब्दस्पर्शरूपरसगन्धा गुणाः विद्यमानाः। एतेषाम्पञ्चभूतानां शब्दस्पर्शरूपरसगन्धा एते क्रमेण पञ्चविशिष्टविषयाः। परं सहैव पूर्वभूतानाङ्गुणा अपि एतेषु समाविष्टाः।[५]

---

१. इच्छाप्रयत्नोत्पत्तावपि शरीरमपेक्षणीयमिति चेत्? अपेक्षतां तत्र तयोरागन्तुकत्वम् यत्र पुनरिमौ स्वाभाविकावासातो तत्रास्यापेक्षणं व्यर्थम्। न च बुद्धीच्छा प्रयत्नानां नित्यत्वे कश्चिद् विरोधः। दृष्टा हि रूपादीनां गुणानामाश्रयभेदेन द्वयी गतिः नित्यानित्यता च। तथा बुद्ध्यादीनामपि भविष्यति।(न्याय क०)

२. वैशेषिकसूत्रम् – २/१/२०

३. पुरुषस्य दर्शनार्थं केवल्यार्थं तथा प्रधानस्य। पङ्ग्वन्धवदभ्योरपि संयोगस्तत्कृतः सर्गः।। सां०का०–२१

४. प्रकाशक्रियास्थितिशीलं भूतेन्द्रियात्मकं भोगापवर्गार्थं दृश्यम्। पा.यो. २/८

५. प्रकृतेर्महास्ततोऽहङ्कारस्तस्माद् गणश्च षोडशकः। तस्मादपि षोडशकात्पञ्चभ्यः पञ्चभूतानि।। सा०का०–२२

लिङ्गशरीरम् – लिङ्गशरीरं सर्वप्रथमं सृष्टेः समारम्भकालादेवोत्पद्यते। इदं सूक्ष्मशरीरं प्रकृत्या प्रतिपुरुषमेकमेकं निर्मीयते तथैदमसक्तं शिलायामपि गमनशीलं नियत सृष्टेरारभ्य महाप्रलयपर्यन्तन्नैरन्तर्येण तिष्ठति, अस्य स्वरूपं महत्त्वमहङ्कार-एकादशेन्द्रियाणि पञ्चतन्मात्राणि चेत्थमष्टादशावयवानां समुदाय एव सूक्ष्मशरीरमिदम्।[१]

तन्मात्रसर्गः प्रत्ययसर्गश्च – तन्मात्रसर्गस्य भोग्यत्वं भोगाधिकरणत्वञ्च स्वरूपनिष्पत्तिः प्रत्ययसर्ग-विना भवितुन्नार्हति नापि च भवति। यतो हि बुद्धिस्वरूपकारणविना च शब्दास्पर्शादिषु कथं भोग्यता गमिष्यति। धर्मादिस्वरूपकारणं विना च शब्दादीनां स्वरूपस्य निष्पतिरेव कालत्रयेऽपि भवितुन्न शक्यते। अतः तन्मात्रसर्गस्य प्रत्ययसर्गस्य च द्वयोर्नितान्तमावश्यकता वर्तते।[२]

भूतसृष्टिः – अत्र भूतादिसृष्टिर्निरूप्यते। ब्राह्म-प्राजापत्येन्द्र पैत्र-गान्धर्व-याक्ष-राक्षस-पैशाचा-इत्याष्टविधा देवानां सृष्टिः।[३] अष्टधा विकृतिपतेषु सर्गेषु ब्राह्मः प्रथमसर्गः। सर्गोऽयम्ब्रह्मणस्सत्यतपोजननामकेषु सम्प्रवर्तते। प्राजापात्यलोको महर्लोकस्तत्र प्रजापति सम्बन्धिनो देवसमूहाः, कुमुदाः ऋभवाः प्रतर्दनाः अजनाभाः, अमिताभाः इमे पञ्चविधाः कल्पसहस्रायुषो निवसन्ति। ततोऽधः स्वरितिनामा इन्द्रलोकः। पितृलोके-जायमानस्सर्गः पैत्रः, पितृलोकश्चन्द्रलोकोऽपि शास्त्रविद्भिः कथ्यते। मेरुपर्वतस्य पृष्ठभागे दिवि च गन्धर्वा निवसन्ति अतो गान्धर्व लोकः। वरुणलोके जायमाना सृष्टिर्याक्षसृष्टिः। अतलनामकमधोलोकमारभ्य पाताललोकपर्यन्तजायमानस्सर्ग एव राक्षससर्गः। ततोऽधः दैत्यदानवनिवातक-वचप्रभृतयो वसन्ति। इत्थमष्टधा सर्गः निरूपितः।[४]

प्रधानसृष्टिः परार्थम्– महदादि विशेषभूतानि यानि सन्ति स्थूलभूतानि तत्पर्यन्तस्सर्गः प्रकृत्यैव कृतः, नेश्वरेण न ब्रह्मोपादानः, नाप्य कारणः। प्रकृतिर्नित्या, यदिप्रकृतिमात्रेणैव संसारो भविष्यति तर्हि सदैव भवितव्यम्। प्रकृतेः प्रवृत्तिः प्रतिपुरुषम्मोक्षाय एव। अत इयम्पदार्था भवति। यदा पुरुषः प्रकृतेर्बन्धनाद् मुच्यते तदा प्रकृतिरपि तस्मात् पृथग्भवति। अत एव प्रकृतेः प्रवृत्तिस्स्थापना स्वार्थवदस्ति। प्रकृत्या पुरुषमुक्तिरेव स्वार्थः। अनेन क्रमेण सक्षिप्ततया सांख्ययोगयोः सृष्टिक्रमः निरूपितः।

पूर्वोत्तरमीमांसादर्शनमनुसृत्य सृष्टिः

मीमांसायाः न्यायवैशेषिकयोरिव जगतो जगतश्च कारणभूतपदार्थानां सत्ता स्वीकृता, एते पदार्थाः प्रभाकरमतादभाट्टमताद्मुरारिमताञ्चभिन्नाः।

मीमांसासूत्रस्य-शाबरभाष्ये-द्रव्यगुणकर्मावयवानां चतुर्णामुल्लेखः कृतः। आचार्य प्रभाकरः **"प्रकरणप्रपञ्चिकायाम्"** द्रव्यगुणकर्मसामान्यसमवायसंख्याशक्तिसादृश्यांश्चैतानष्टपदार्थानमन्यत। प्रभाकरेण

---

१. भावैरधिवासितं लिङ्गम्। सां॰का॰-४०

२. द्विविधः प्रवर्तते सर्गः। तत्त्वकौमुदी-५२

३. भुवनज्ञानं सूर्ये संयमात्। पा॰यो॰सू॰ ३/२६

४. ब्राह्म-प्राजापत्यैन्द्र-पैत्र-गान्धर्व-याक्ष-राक्षस-पैशाचा इत्यष्टविधो देवसर्गः।। सां॰प्र॰भा॰ पृ. १४१

नवधा द्रव्याणि स्वीकृतानि–क्षितिजलवाय्वग्न्याकाशकालादिगात्ममनांसि। एतेषां द्रव्याणां स्वरूपम्प्रायो न्यायवैशेषिकानामनुसारेणास्ति। प्रभाकरमतेन गुणानां संख्यैकविंशतिः।

कुमारिलमतम्– कमारिलमतेन पदार्थस्य द्वे श्रेण्यौ स्तः, भावोऽभावश्च, भावपदार्थस्य चत्वारोऽवान्तरभेदाः प्रकीर्तिताः, द्रव्यं, गुणः कर्म सामान्येति। एवमेवाभावस्यापि चत्वारः प्रकाराः, प्रागभावोऽत्यन्ताभावो ध्वंसाभावोऽन्योन्यभावश्च।

मुरारिमतम्– मुरारिमते एक एव पदार्थस्वीकृतः। "ब्रह्म" एनमेकम्पदार्थं स्वीकरणात्परवर्तिनो मीमांसका "मीमासादर्शनं" "ब्रह्ममीमांसा" अनेन नाम्ना कथयंल्लोकव्यवहारस्य सञ्चालनाय मुरारिमते चतुर्विधा पदार्थास्स्वीकृताः।

जागतिकविषयाणाञ्चसत्यता– जगतो जागतिकविषयाणाञ्च सम्बन्धे मीमांसादर्शनस्य सिद्धान्तो निजी वर्तते मीमांसायामतमस्ति यद्बाह्यवस्तूनामुपलब्धेस्साधनान्यस्माकमिन्द्रियैर्यस्मिन रूपे जगतः प्रत्यक्षम्भवति तस्मिन्ने रूपे जगतस्सत्यता सिद्धा। मीमांसाकारा आत्मानन्तथा परमाणुन्नित्यममन्यत। सृष्टिरचनाया मूले कर्मणां सञ्चयः कारणस्वरूपस्स्वीकृतः।

मीमांसा मूलजगतस्सृष्टिम्प्रलयञ्च न मनुते। केवलम्मानवा उत्पद्यन्ते नश्यन्ते च। जगतस्सृष्टिविनाशश्च न कदापि सञ्जायते, केचित्मीमांसका अणुवादं स्वीकुर्वन्ति। जगतस्सर्वे पदार्था अणोरुत्पद्यन्ते, कर्मणास्फलोन्मुखे सत्यणुसंयोगेन मानवोत्पद्यन्ते फलसमाप्तौ तेषान्नाशः।[१]

अद्वैतवेदान्ते सृष्टिः – उत्पत्तिविलययोः कर्त्तृत्वादीश्वरो जगत्कारणमुच्यते, उत्पत्तिविलयोरर्थ आविर्भावस्तिरोभावश्च। अयमीश्वर आत्मनि विलयितं समस्तजगत्प्राणिनाङ्कर्मानुसारेणाविर्भूतङ्करोति। स एवेश्वर प्राणिनाङ्कर्मणाङक्षीणो सति समस्तसंसारमात्मनि निगृह्यति। एते सृष्टिप्रलया एतादृशा एव यथाहर्दिव जागृतसुषुप्तिर्वा।

वेदान्तसृष्टिप्रक्रियाया विषयोऽतीव सूक्ष्मस्तथाजटिलः। अस्यास्सृष्टिप्रक्रियास्सम्बन्धे श्रुतिरेकं सामान्यमभिमतम्प्रकटयति। सा कथयति–यथा जीवितमनुष्यस्य शरीरे केशा नखादय उत्पद्यन्ते तथैवाक्षर ब्रह्मणो जगदुत्पत्तिः। शंकाराचार्यो जगत उत्पत्तेः किमपि विशेषम्प्रयोजनन्नाकथयत्। अस्मिन् सम्बन्धे सोऽकथयद् यज्ञगतः कारणत्वादप्यीश्वरः केवल लीलायै स्वभावतः प्रयोजनं विना तथैव सृष्टिङ्करोति, यथा मनुष्यशरीरे किमपि वहिः प्रयोजनं विना श्वासप्रश्वासाश्चलन्येव।

ब्रह्मणनित्यपरिणामीकूटस्थश्चैतन्यञ्च, तस्य स्थूलानि सूक्ष्माणि च भवन्ति। एतानि स्थूलसूक्ष्मरूपाणि मायया अज्ञानस्य वा, अतएव सूक्ष्मात् प्रभृति आस्थूलं यः परिणामो विकारो वा दृश्यते सोऽचेतनमायया मिथ्याविस्तारो न तु चैतन्यस्य इयमव्यक्ता सृष्टिशक्तिर्माया पूर्वं सूक्ष्मविषयाणां रूपे व्यक्ता भवति तदा च स्थूलविषयाणां रूपन्धारयति। माया त्रिगुणात्मिकाभिहिता, सत्त्वरजस्तमांसि एते त्रयोगुणास्सतत्परिणामिनः, [२]एतेषु यदा रजोगुणप्रधानास्तदा मायाया विक्षेपशक्त्यायुक्तेन चैतन्य ब्रह्मण आकाशः, आकाशाद्

१. अणुवादसमर्थने द्रष्टव्यः प्रभाकरविजयः पृ. ४३–४६

वायुर्वायोरग्निरग्नेराप अद्भ्यः पृथिव्याः क्रमेणोत्पत्तिर्भवति,[१] एतेषूत्पन्नभूतेषु त्रयो गुणाः निज निजकारणादनिजनिजकार्ये आगच्छन्ति। एतानि पञ्चमहाभूतानि वेदान्ते "सूक्ष्मभूतानि" तन्मात्राणि वा" अपञ्चीकृतभूतानि कथितानि। एतेभ्यस्सूक्ष्मभूतेभ्यस्सूक्ष्मशरीराणि स्थूलभूतानाञ्चोत्पत्तिरभवत्।

इत्थं भारतीय दर्शनेषु यत्र यत्र सृष्टिक्रम आसीत् तत् मया संक्षिप्तेन अस्मिन् लघुशोधपत्रे प्रस्तोतुं यत्नो विहितः।

१. तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः आकाशाद्वायुः वायोरग्निरग्नेरापः अद्भ्यः पृथिवी पृथिव्या ओषधयः ओषधीभ्योन्नमन्नापुरुषः।

विधेस्त्रैविध्यम्

डॉ. ए.एस. आरावमुदन्

मन्त्रब्राह्मणात्मको वेदः इत्यनेन वेदस्य द्वैविध्यं प्रतिपादितं वर्तते। तत्र च कस्यचित् देवताविशेषस्य स्तुतौ प्रयुक्तं यदर्थस्मारकं वाक्यं तदेव वाक्यं मन्त्रः इति कथ्यते। एतादृश वेदवाक्यार्थनिर्णयार्थं प्रवृत्तं मीमांसाशास्त्रम्। अत एव पदवाक्यप्रमाणशास्त्रेषु मुख्यं स्थानमावहति वाक्यशास्त्रं नाम मीमांसाशास्त्रम्। अस्मिन् च मीमांसाशास्त्रे प्रमाणादिद्वादशलक्षणानि सन्ति। द्वादशसु लक्षणेषु धर्माधर्माविव अनुष्ठानोपयोगार्थं प्रधानतया विचारितौ, अर्थात् धर्माधर्मयोः इतिकर्त्तव्यतापूरकं मीमांसाशास्त्रम् भवति। उक्तं च भट्टपादैः–

धर्मे प्रमीयमाणे तु वेदेन करणात्मना।
इतिकर्तव्यताभागं मीमांसा पूरयिष्यति।।

अयं व धर्माधर्मज्ञानसंपादने करणात्मको वेदः, अपौरुषेय इति

वेदस्याध्ययनं सर्वं गुर्वध्ययनपूर्वकम्।

वेदाध्ययनसामान्यात् अधुना अध्ययनम् यथा। इत्यादिना साधितः। एतादृशापौरुषेयानि वेदवाक्यानि तावत् पञ्चधा विभक्तानि। विधिवाक्यानि, निषेधवाक्यानि, मन्त्रवाक्यानि, नामधेयवाक्यानि, अर्थवादवाक्यानि चेति।

तत्र विधिवाक्यान्येव ब्राह्मणवाक्यानि इत्युच्यन्ते। विधायकानि वाक्यानि ब्राह्मणवाक्यानि। निषेधवाक्यानामपि विधिवाक्यैरेव ग्रहणात् चत्वारि वा वेदवाक्यानि विभज्यन्ते। तत्र विधिवाक्यघटक द्रव्यादि पदानामिव नामधेयानां अर्थवादानाञ्च विध्येकवाक्यतयैव धर्मे प्रामाण्यम् न स्वातन्त्र्येण।। यद्यपि मन्त्राः विधिवाक्येन पदैकवाक्यतां वाक्यैकवाक्यतां वा न प्राप्नुवन्ति तथाऽपि भूम्ना छत्रिणो गच्छन्ति इतिवत् मन्त्राणामपि चोदनापदेन ग्रहणमिति।

तत्र "**अथाऽतो धर्मजिज्ञासे**[१] "ति आदिमसूत्रेणाभिहितजिज्ञास्यो धर्मः न प्रत्यक्षादि प्रमाणगम्यः, अपि तु चोदनैव गम्यः, इति "**चोदनालक्षणाऽर्थो धर्मः**[२]" इत्यनेन द्वितीयसूत्रेण महर्षिणा जैमिनिना

१. जै. सू. १.१.१
२. जै. सू. १.१.२

सूत्रकारेण सूचितम्। चोदनापदम् ''**चोदनेति क्रियायाः प्रवर्त्तकं वचनमाहुः**'' इति भाष्यात् विधिवाक्यपरमेव। अत एवं चोदना हि "**भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवं जातीयकमर्थं शक्नोति अवगमयितुम्। नान्यत् किञ्चत् इन्द्रिय**[३]" मिति भणितं भाष्यकारैः शबरस्वामिभिः। यथा "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत[४]" इत्यादि विधिवाक्यानि स्वर्गरूपश्रेयस्साधनत्वं दर्शपूर्णमासादीनाम् अस्तीति बोधयन्ति।। तथा च विध्यादिषु वेदभागेषु विधेरेव प्राधान्यम् इतरेषां विधिशेषतया प्रामाण्यात्। तत्र अज्ञातार्थज्ञापको वेदभागः, अप्रवृत्तवर्तनं वा विधि इत्युच्यते। अयं च विधि **अपूर्वविधिः, नियमविधिः, परिसंख्याविधिः चेति त्रिविधः** इति मन्त्राधिकरणे (१.२.४) निरूपितम्। तत्र सूत्राणि तावत् (१) विधिर्वास्यादपूर्वत्वात् (१.२.२४) (२) नियमार्था वा पुनः श्रुतिः (४.२.९.२४) (३) परिसंख्या (१.२.४.३४)

एतेषां त्रयाणां विधीनाम् एकया कारिकया वार्तिककारैः कुमारिलभट्टैः लक्षणानि एवम् अभिहितानि।।

विधिरत्यन्तमप्राप्ते नियमः पाक्षिके सति।
तत्रचान्यत्र प्राप्ते च परिसंख्येति गीयते।।[५]

अस्याः कारिकायाः अयमभिप्रायः– तत्र यो अत्यन्तम् अप्राप्तम् अर्थं बोधयति स अपूर्वविधिः। यः पक्षप्राप्तार्थं नियमयति स नियमविधिः। यः समुच्चित्यप्राप्तौ इतरनिवृत्तिं करोति सः परिसंख्याविधि रिति।।

१. अपूर्वविधिः

यस्य यदर्थत्वं प्रमाणान्तरेणाप्राप्तं तस्य तदर्थत्वेन यो विधिः स अपूर्वविधिः। यथा–"यजेत स्वर्गकामः" इत्यत्र यागस्य स्वार्गर्थत्वं न प्रमाणान्तरेण प्राप्तं, किन्तु अनेननैव विधिना इति भवत्ययम् अपूर्वविधिः।

वार्तिके– "**विधिरत्यन्तमप्राप्ते**" इत्यस्य स्वविषये अर्थे प्रमाणान्तरेण अत्यन्तम्" इति न विधिः स्यात् इतिचेत् प्रमाणान्तरेणाऽप्राप्तं नाम स्वेतरप्रमाणजन्यप्रमितिविषयत्वप्रतियोगिकत्रैकालिकाभाववत् इत्यर्थः। तथा च स्वरूपतः प्रमाणान्तरज्ञातत्वेऽपि फलसाधनत्वरूपेण अज्ञातत्वात् न दोष इति अवगन्तव्यम्।।

---

३. शाबरभाष्यम्।
४. कात्यायनश्रौतसूत्रम् अ २.३.४
५. तन्त्रवार्तिकम्।
६. तैत्तरीयसंहिता १.५.९.१

ननु कर्मस्वरूपमात्रबोधकेषु विधिषु अव्याप्तिः। यतो हि तैः फलसाधनत्वाबोधनात्। नच यस्य यद्धर्मावच्छिन्नत्वं प्रमाणन्तरेण अप्राप्तं तस्य तद्धर्मावच्छिन्नबोधकत्वमेव अपूर्वविधित्वम् इत्यत्रैव तात्पर्यम्। कर्मोरुत्पत्तिवाक्ये च यागत्वेन रूपेण यागस्य अज्ञातस्य बोधनात् न अव्याप्तिः इति वाच्यम्। नियमपरिसंख्याविध्यो अतिव्याप्तेः। नियमपरिसंख्यारूपधर्मयोः सर्वथा अप्राप्तत्वात् इति चेत् न। नियमपरिसंख्यातिरिक्तेत्यतः ज्ञातधर्मावच्छिन्नबोधकत्वम् अपूर्वविधित्वम् इति अदोषात्। अपूर्वविधि इत्यनेन मूलविधिपदम् अपूर्वविधिपरमिति सूचितम्।

तथा च यो विधि अत्यन्तम् अप्राप्तमर्थं प्रापयति स अपूर्वविधिः। प्रसिद्धोदाहरणं तावत् दर्शपूर्णमासप्रकरणे "व्रीहीन् प्रोक्षति[७]" इति। एतत् विध्यभावे दर्शमपूर्णमाससम्बन्धिषु व्रीहिषु प्रोक्षणं प्राप्नोत्येवेति अत्यन्ताप्राप्तप्रोक्षणप्रापकत्वात् अयम् अपूर्वविधिः।

एवम् अपूर्वविधेः निष्कृष्टलक्षणं विधित्रयपरित्राणे एवम् अभिहितम्–

तुल्यविध्यन्तराप्रवृत्तिसहितायां केवलायां वा स्वाप्रवृत्तौ यस्यार्थस्य स्वविषयप्रमाक प्राप्यविरोधिभिन्नस्य यत्रात्यन्ताप्राप्तिः स्वाप्रवृत्तिकालीनस्वविषयनियमा नियतान्यतरप्राप्तिप्रयोजकाभावप्रतियोगिमानान्तरा तस्मिंस्तत्प्राप्तिफलको वा, तत्प्राप्तीतरफलकत्वरहितो वा विधि अपूर्वविधिरिति उच्यते। तत्रैव–

अप्राप्तांशप्रापणपरिसंख्यामात्रफलकतारहितः ।
यो विधिरपूर्वविधिरयमिति पूर्वाचार्यवर्यतात्पर्यम्।।

इत्यनेन अप्राप्तांशपरिपूरणपरिसंख्यामात्रफलकत्वाभावेसति विधि अपूर्वविधिः इत्येवं "विधिरत्यन्तम् अप्राप्ते" इति वदताम् आचार्याणां तात्पर्यमिति सूचितम्।

अपूर्वविधिभेदाः– अयं च अपूर्वविधिः चतुर्विधो भवति। उत्पत्ति विधिः, विनियोगविधिः, प्रयोगविधिः, अधिकारविधिः चेति।

(क) उत्पत्तिविधिः

उत्पत्तिविधिः नाम कर्मस्वरूपमात्रबोधको विधिः इत्युच्यते। यथा–"अग्निहोत्रं जुहोति[८]"इत्यादिषु एतत् विध्यभावे अग्निहोत्रादीनाम् इष्टसाधनत्वं न केनाऽपि प्रमाणेन प्राप्यत इति अयम् अपूर्वविधिः। एवमेव "दध्ना जुहुयात्" इत्यादीनां गुणविधीनामपि अपूर्वविधिभेदकत्वं ज्ञेयम्।

---

७. तैत्तरीयसंहिता १.५.९.१

८. तैत्तरीयसंहिता १.५.९.१

(ख) विनियोगविधिः

अङ्गप्रधानसम्बन्धबोधको विधिः इत्युच्यते। यथा "दध्ना जुहोति" इत्यादौ दध्नः होमसाधनत्वम् एतत् विध्वभावे न सम्भवतीति अयमपि अपूर्वविधिः। एतस्य विनियोगविधेः सहकारिभूतानि श्रुत्यादीनि षट् प्रमाणानि सन्ति। तेषु पूर्वपूर्वस्य प्राबल्यम् इति "श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यं अर्थविप्रकर्षात्"[९] इत्यादिना सूत्रेण अभिहितमिति अवगन्तव्यम्।

(ग) प्रयोगविधिः

प्रयोगप्राशुभावबोधको विधिः प्रयोगविधिः। स च अङ्गवाक्यैकवाक्यताम् आपन्नः सन् प्रधान विधिरेव। अयं च विधिः साङ्गं प्रधानमनुष्ठापयन् विलम्बे प्रमाणाभावात् अविलम्बापरपर्यायं प्रयोगप्राशुभावं विधत्ते। एतत् विध्यभावे एतादृश प्रयोगप्राशुभावः कथमपि प्राप्तुं न शक्यत इति अयमपि अपूर्वविधिः। अयं प्रयोगविधिरेव स्वविधेयप्रयोगप्राशुभावसिद्धयर्थं नियतं क्रममपि पदार्थविशेषणतया विधत्ते। तत्र क्रमो नाम विततिविशेषः पौर्वापर्यरूपो वा इति पञ्चमाध्याये विस्तरेणाभिहितम्।

(घ) अधिकारविधिः

फलस्वाम्यबोधको विधिः अधिकारविधिः। फलस्वाम्यं च कर्मजन्यफलभौक्तृत्वम्। स च यजेत स्वर्गकाम इत्येवं रूपः। अनेन हि स्वर्गमुद्दिश्य यागं विदधता स्वर्गकामस्य यागजन्यफलभोक्तृत्वं प्रतिपाद्यते। "यस्याहिताग्नेः अग्निः गृहान् दहेत् सोऽग्नये क्षामवते अष्टाकपालं पुरोडाशं निर्वपेत्" इत्यादिभिस्तु गृहदाहादौ निमित्ते कर्मविद्भ्यः निमित्तवतः कर्मजन्यफलस्वाम्यं प्रतिपाद्यते इति अयमपि अपूर्वविधिरेव।

२. नियमविधिः

पक्षे अप्राप्तस्य तु यो विधिः सः नियमविधः। यथा– दर्शपूर्णमासप्रकरणे "व्रीहीन् अवहन्ति" इति। एतत् विध्यभावे दार्शपौर्णिकमासिकेषु व्रीहिषूत्पत्तिवाक्यावगतपुरोडाशोपयोगितण्डुलनिष्पत्त्यनुकूल-वैतुष्यकार्याय अवहननवत् कदाचित् नखविदलनमपि प्राप्नुयात् इति तस्मिन् पक्षे अवहननस्य प्राप्तेः अभावात् कार्यान्यथोपपत्तेः अवहननस्य पाक्षिकी प्राप्तिः स्यात्। अनेन तु विधिना अवघातस्य न वैतुष्यार्थत्वं बोध्यते अन्वयव्यतिरेकसिद्धत्वात्। किन्तु नियमः। स च अप्राप्तांशपूरणं वैतुष्यस्य हि अनेकोपायसाध्यत्वात् यस्यां दशायाम् अवघातं परिहृत्य उपायान्तरं गृहीतुम् आरभते तस्यां दशायाम् अवघातस्य अप्राप्तत्वेन तद्विधानात्मकम् अप्राप्तांशपूरणमेव अनेन विधिना क्रियते। तस्मात् नियमविधौ अप्राप्तांशपूरणात्मकः नियम एव वाक्यार्थः। पक्षे अप्राप्ततादशायाम् अवघातविधानमिति यावत्। न तु अपूर्वविधाविव अत्यन्ताप्राप्तयागविधानमिति। नच वैतुष्यस्य नखविदलनेनापि संभवात् अवहनन नियमः व्यर्थः प्रयोजनाभावात् इति वाच्यम्। अवघातेनैव वैतुष्यकरणे किञ्चित् अदृष्टं जन्यते इति

नियमादृष्टाङ्गीकारात्। नियमेन दृष्टकार्यालाभेऽपि अदृष्टस्योत्पत्तेः। तच्च अपूर्वं फलापूर्वे उपयुज्यते। तेन नियमापूर्वाभावे फलापूर्वमेव नोत्पद्यते इति कल्पनात् नियमापूर्वस्य न वैयर्थ्यम्।

उक्तं च नियमविधेः निष्कृष्टं लक्षणं **विधित्रयरित्राणे श्रीवेङ्कटाचार्यदीक्षितैः** स्वनिवर्त्यस्वबोध्यार्थप्रापकप्रमाणान्तराप्रवृत्तिसहितायां केवलायां वा स्वाप्रवृत्तौ स्वाधिकरणक्षणभिन्नक्षण-वृत्तिप्राप्तिकरम्बिता यस्यार्थस्याप्राप्तिः तस्य स्वविषयस्थानात् स्वतो निवृत्तिकारिणीं तत्तुल्यपदार्थस्याप्राप्ते प्राप्तिं कुर्वन् विधिः नियमविधिः ज्ञेय इति।

एतदुक्तं भवति–"नियमः पाक्षिके सति" इति वार्तिकस्य निर्वर्त्यै पाक्षिके सति नियम इत्यर्थः। ततश्च पक्षप्राप्तिमतो अर्थस्य निवृत्तिं कुर्वतीं कस्यचिदर्थस्याप्राप्ते प्राप्तिं कुर्वन् विधि नियमविधि इति लक्षणं फलितम्। एतच्च "व्रीहीन् अवहन्ति" इति प्रसिद्धनियमविधावस्ति। तस्य पक्षप्राप्तिमद्विदलनादि निवृत्तिफलकावघातप्राप्तिकारित्वात्।

३. परिसंख्याविधिः

उभयस्य युगपत् प्राप्तौ इतरव्यावृत्तिपरोविधिः परिसंख्याविधिः। यथा– चयन प्रकरणे "इमामगृभ्णन् रशनामृतस्य इति अश्वाभिदानीम् आदत्ते,[१०]" इति अश्वरशनाग्रहणाङ्गत्वेन मन्त्रविधिः। एताद्विध्यभावे रशनाग्रहणप्रकाशक अयं मन्त्रः रशनादान प्रकाशनसामर्थ्यरूपात् लिङ्गात् अश्वरशनाऽऽदाने इव गर्दभ-रशनाऽऽदानेऽपि नियमेन प्राप्नुयात् इति। एतत् विधिसत्वे तु अनेन मन्त्रेण अश्वरशनामेव आददीत, न तु गर्दभरशनाम्। गर्दभरशना तु तूष्णीमेव ग्राह्या इति गर्दभरशनायां मन्त्रनिवृत्तिः भवतीति उभयस्य युगपत् प्राप्तौ इतरव्यावृत्तिफलकत्वात् अयं परिसंख्याविधिः।

एवं पञ्चपञ्चनखाः भक्ष्या इतीदं वाक्यं न भक्षणविधिपरम्। भक्षणस्य रागतः प्राप्तत्वात् नापि नियमपरम्। पञ्चनखापञ्चनखभक्षणस्य युगपत् प्राप्तौ पक्षे अप्राप्त्यभावात्। अत इदम् अपञ्चपञ्चनखभक्षणनिवृत्तिपरं इति भवत्ययं परिसंख्याविधिः।

इयं च परिसंख्या श्रौती लाक्षणिकी चेति द्विविधा भवति। तत्र "अत्रह्येवावपन्ति"[११] इति श्रौती परिसंख्या एवकारेण पवमानातिरिक्तस्तोत्रव्यावृत्तेः अभिधानात्। पञ्च पञ्चनखा भक्ष्या इत्यत्र तु लाक्षणिकी। इतर निवृत्ति वाक्यस्य पदाभावात्। अतो हेतोः इयं लाक्षणिकी परिसंख्या त्रिदोषग्रस्ता। दोषत्रयं च श्रुतहानिः, अश्रुतकल्पना, प्राप्तबाधश्चेति। यथा पञ्चपञ्चनखा भक्ष्या इत्यत्र श्रुतस्य पञ्च पञ्च नखभक्षणस्य हानात्, अश्रुत-अपञ्चनखभक्षणनिवृत्तिकल्पनात्, प्राप्तस्य च अपञ्चनखभक्षणस्य बाधनात् दोषत्रययुक्ता परिसंख्या इति। एतेषु दोषत्रयेषु दोषद्वयं शब्दनिष्ठं, प्राप्तबाधस्तु दोष अर्थनिष्ठः।

९. जै. सू. ३.३.१४

१०. तैत्तरीयसंहिता ५.१.२.१

११. तै. स. ५.१२.१

उक्तम् च–

श्रुतार्थस्य परित्यागात् अश्रुतार्थस्य कल्पनात्।
प्राप्तस्य बाधादित्येवं परिसंख्या त्रिदूषणा।। इति।[१२]

परिसंख्यायया: निष्कृष्टं लक्षणं विधित्रयपरित्राणे एवम् अभिहितम्। निवृत्तिफलकोविधि: परिसंख्याविधि:। "इमामगृभ्णन् रशनामृतस्य इत्यश्वाभिधानीम् आदत्ते "[१३]इत्यादिषु परिसंख्यादिषु सर्वेषु निवृत्तिफलकत्वस्य अनुगतत्वात् इति।

उपयुक्तग्रन्थसूची

१. विधित्रयपरित्राणम् – श्रीवेङ्कटाचार्यदीक्षितविरचितम्
२. विधिरसायनम् – श्रीमदप्पयदीक्षितविरचितम्
३. न्यायरत्नमाला – पार्थसारथिमिश्रविरचिता
४. मीमांसाशास्त्रसार: – अनन्तकृष्णशास्त्रिविरचित:
५. मीमांसान्यायप्रकाश: – आपदेवप्रणीत:
६. अर्थसंग्रह: – लौगाक्षिभास्करविरचित:
७. मीमांसापरिभाषा – श्रीकृष्णयज्वप्रणीता

१२. तन्त्रवार्तिकम्
१३. तै सं ५.१.२.१

स वा एष पुरुषः पञ्च वा पञ्चात्मा

(वैष्णवागमानुसारी)

नारायणम्, वेङ्कटश्रीनिवासमूर्तिः

सर्वैः ज्ञायते यदपारकारुण्यसौशील्यवात्सल्यौदार्यैश्वर्यसौन्दर्यमहोदधिः अनालोचितविशेषाशेषलोकशरण्यः प्रणतार्तिहारः, आश्रितवात्सल्यैकजलधिः, अनवरतविदितनिखिलभूतजातयाथात्म्यः, अशेषचराचरभूतनिखिलनियमननिरतः, अशेषचिदचिद्वस्तुशेषिभूतः, निखिलजगदाधारः, अखिलजगत्स्वामी, अस्मत्स्वामी, सत्यकामः, सत्यसङ्कल्पः, सकलेतरविलक्षणः, अर्थिकल्पकः, आपत्सखः, श्रीमन्नारायण एव । स च परमात्मा अशरण्यशरण्यस्मन् पञ्चधा व्यवस्थितः पर–व्यूह–विभव–अन्तर्यामी–अर्चेति । तत्र तावत्–

परः

सर्वेषामण्डानामुपरि सनातनं नित्यमचिन्त्यं देवैरनभिलक्ष्यं नित्यशुद्धमुक्तस्वभावपुरुषैरनुभूयमानं वैष्णवाण्डमेकं विद्योतते। तस्मिन् व्योमनिलये परमात्मनस्सकाशात् हिरण्मयमण्डमभवत् । तदन्तर्गतानां सर्वेषामण्डानामुपरि सनातनमचिन्त्यं देवैरप्यनभिलक्ष्यं नित्यशुद्धमुक्तस्वभावैरनुभूयमानं वैष्णवाण्डं वर्तते। तत्र विष्णुलोकाश्चत्वारः आमोद–प्रमोद–सम्मोद–वैकुण्ठ इति, एकैकस्योपरि एकैकः यथाक्रमेण वर्तन्ते। तस्मिन् हेममयप्राकारगोपुरतोरणशतसहस्रैः कनककमलकुसुमादिभिरप्यलङ्कृते अमृतजलपूर्णैश्शतसहस्रैश्च सरितां प्रभासमाने दिव्यलोके सहस्रादित्यसंकाशं हेममयं द्वादशतलैर्युतं विमानं, नित्यज्ञानक्रियैश्वर्यब्रह्मादिदेवऋषिभिः नित्यपरिजनैर्युतं मन्दिरम् एकं विराजते।

तस्मिन् व्योमनिलये परमात्मा परं धामः परं ज्योतिः सर्वशक्तिमयः अमलः निर्द्वन्द्वः निर्विकल्पः नित्यः अचिन्त्यः सनातनः अप्रमेयः निराद्यन्तः दृश्यादृश्यः अतीन्द्रियः सुसूक्ष्मत्वादनिर्देश्यः सर्वज्ञः सदसद्विभुः अनादिः सर्वहेयविवर्जितः सर्वव्यापी सर्वभूतेषु स्थितः शङ्खचक्रादिदिव्यायुधधरः सहस्रादित्यसंकाशः चतुर्भुजः सुभ्रूललाटः सुनासः सुस्मिताधरविद्रुमः तनुमध्यः विशालवक्षस्थलः समविभक्तः सर्वाङ्गः अनिर्देश्यवपुः दिव्यरूपसंहननः स्निग्धवर्णः स्वानुरूपः पीताम्बरधरः पुष्पहाससुकुमारः पुण्यगन्धवसितानन्तदिगन्तरालः दिव्यमङ्गलविग्रहः विशिष्टः ज्ञानशक्त्याद्यनन्तकल्याणगुणः अन्यूनानतिरिक्तैः षाड्गुण्यैरलंकृतः समस्समविभक्ताङ्गस्सर्वावयसुन्दरः दिव्याभरणैर्युक्तः अनन्तगरुडविष्वक्सेनादिदिव्यसूरिभिः परिशोभितः सहस्रफणाफणिमण्डलमण्डिते आदिशेषे दिव्यशय्यायां विराजमानः वासुदेवः

सुधाकल्लोलसंकुलैः श्रिया नित्यानपायिन्या सेव्यमानश्च इति परस्वरूपस्य वर्णनं वैष्णवागमयोः उपवर्ण्यते[१]।

व्यूहः

व्यपोहनं व्यूहः[२] । व्यूहं नाम सृष्टिरचनाव्यासङ्गः। स च व्यूहो द्विविधः दैविको मानुषश्चेति। पृथिव्यप्तेजोवायुराकाशेति पञ्चभूतानि यथा विद्यन्ते, सभ्याहवनीयान्वहार्यगार्हपत्यावसथ्यादि पञ्चाग्निकुण्डाः तथा सन्ति, शरीरे यथा वायुपञ्चकं विद्यते, आलये यथा ध्रुव-कौतुक-उत्सव-स्नपन-बलिबेराणि राराजन्ते तथा व्यूहस्वरूपं विष्णु-पुरुष-सत्य-अच्युत-अनिरुद्धेति पञ्चधा विलसन्ति

स वा एष पुरुषः पञ्च वा पञ्चात्मा
पञ्चधाग्नीन् व्यक्रामद्विराट्स्त्रष्टा
पोपूयमानः पञ्चभिः स्वगुणैः प्रसन्नैः सर्वानिमान् धारयिष्यसि
विष्णुपुरुषसत्याच्युतानिरुद्ध[३] इत्यादिभिः श्रुतिवचनैः ।

तत्र विष्णुः महाविष्णुः, सदाविष्णुः, व्यापिनारायण इति विष्णोः आदिमूर्तित्वं प्रतिपाद्यते। विष्णोरंशः पुरुषः, महाविष्णोरंशः सत्यः, सदाविष्णोरंशः अच्युतः, व्यापिनारायणांशः अनिरुद्ध इति, तत्र पुरुषस्य पुरुष-पुरुषात्मक-परमपुरुष-धर्ममयेति, **सत्यस्य** सत्य-सत्यात्मक-ज्ञान-सर्वतेजोमयेति, **अच्युतस्य** अच्युत-अपरिमित-ऐश्वर्य-श्रीपतिरिति च पुरुषादीनां चतुर्नामानि विराजन्ति।

एते पुरुष-सत्य-अच्युत-अनिरुद्धाः धर्मज्ञानैश्वर्यवैराग्यगुणैर्युतः भवेयुः इति वैखानसागमे[४] व्यूहमूर्तयः दृश्यन्ते ।

पाञ्चरात्रागमे तावत् व्यूहो नाम उपासनार्थं जगत्सृष्ट्यर्थं च वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धभेदेन चतुर्धा व्यवस्थितो भवति[५]।

तत्र वासुदेवः ज्ञान-शक्त्यादि षाड्गुण्यैः, सङ्कर्षणः ज्ञानबलैः, प्रद्युम्नः ऐश्वर्यवीर्यैः, अनिरुद्धः शक्तितेजोभ्यां गुणाभ्यां च विलसन्ति। एतेषु वासुदेव-सङ्कर्षण-प्रद्युम्न-अनिरुद्धादि चतुर्व्यूहात् केशवादि द्वादशमूर्तयः सञ्जाता। यथा-

वासुदेवात् केशव-नारायण-माधवाः, सङ्कर्षणात् गोविन्द-विष्णु-मधुसूदनाः, **प्रद्युम्नात्** त्रिविक्रम-वामन-श्रीधराः, अनिरुद्धात् हृषीकेश-पद्मनाभ-दामोदराः इति च केशवादिद्वादशरूपाः समागताः

१. विमानार्चनाकल्पः पृ. ३०९-३१०
प्रकीर्णाधिकारः ३३, ६-११
यतीन्द्रमतदीपिका पृ. १३४-१३५
२. ईशावास्योपनिषत्
३. विमानार्चनाकल्पः, पृ. ३२१
४. प्रकीर्णाधिकारः ३३, १३-२०
५. यतीन्द्रमतदीपिका पृ. १३५

वर्तन्ते इति व्यूहस्वरूपं तत्रैव उपदिश्यते[१]।

विभवः

विभवो नाम तत्तत्सजातीयरूपेणाविर्भावः अवतारविशेषः। विभवः प्रधानतया दशधा दृश्यते–

मत्स्यः कूर्मो वराहश्च नारसिंहोऽथ वामनः।
रामो रामश्च रामश्च कृष्णः कल्कीति ते दश॥[२]

मत्स्य–कूर्म–वराह–नारसिंह–वामन–भार्गव–दशरथ–बलभद्र–कृष्ण–कल्कीति।

तेषु **मत्स्यरूपः** वेदापहारिदैत्यनिरासपूर्वकं ब्रह्मणः प्रमाणप्रदानार्थमवतीर्णः, कूर्मरूपस्तु जीवानामजरामरणहेतुभूतामृतोत्पादानमन्थराधारत्वेनावतीर्णः, संसारनिमग्नजनोद्धरणकामः स्वमहिषीमुद्धर्तुमवतीर्णः **वराहः**, आश्रितरक्षणार्थं महासुरं हन्तुं स्तम्भोद्भूतः **नारसिंहः**, त्रिविक्रमोभूत्वा स्वपादारविन्दोद्भवेन जलेन जगद्रक्षणार्थमवतीर्णः वामनः दुष्टक्षत्रियनिरसनार्थमवतीर्णः **परशुरामः**, धर्मासंस्थापनार्थमवतीर्णो **श्रीरामः**, प्रलम्बादि निरसनार्थमवतीर्णः **बलभद्रः**, चरमोपायप्रदानार्थमवतीर्णः, **श्रीकृष्णः**, अधर्मिष्ठान्निरस्य पूर्णधर्मप्रवर्तनार्थमवतीर्णः **कल्की** इति च विभावानामेतेषां मत्स्यकूर्मादीनां रूपविशेषाः पाञ्चरात्रागमे[३] सुस्पष्टं विविच्यन्ते।

पद्मनाभादयः षट्त्रिंशद्रूपविशेषाः अपि विभवावतारत्वेन परिगण्यन्ते तत्रैव[४]।

वैखानसागमे तावत् वराहः आदिवराहः–यज्ञवराहः–प्रलयवराह इति त्रिविधो[५] विराजते इति, नृसिंहः तावत् गिरिजनृसिंहः–स्थूणजनृसिंहः–सुदर्शननृसिंह लक्ष्मीनृसिंहः–पातालनृसिंह इति पञ्चविधः[६] भवेदिति, वामनमूर्तिः रूपभेदेन वामनः– त्रिविक्रम इति द्विधा[७] भवेदिति, सन्तानकृष्णः–जगन्मोहनः–बृन्दावनकृष्णः–कालीयमर्दनः–नवनीतनटः–वेणुनादनटः–लीलामानुषविग्रहः–राजगोपालः–ज्ञानगोपालः–गोपालः–गोवर्धनधरः–पार्थसारथिः–बालगोपालः–वटपत्रशायी–सर्वमोहनः इति श्रीकृष्णरूपस्तावद–संख्याकत्वेन विराजते[८]। तस्य रूपाणि वक्तुं नैव शक्यते इति च कृष्णरूपस्य अवान्तरभेदाः

१. यतीन्द्रमतदीपिका पृ. १३६–१३७
अहिर्बुध्न्यसंहिता ४, ४५–४८
२. क्रियाधिकारः ११,१
३. यतीन्द्रमतदीपिका पृ. १३८
४. यतीन्द्रमतदीपिका पृ. १३८
लक्ष्मीतन्त्रम् २, ४८–४९
५. विमानार्चनाकल्पः पृ. ३६६–३६८
क्रियाधिकारः ११, ११–२६
६. क्रियाधिकारः ११, २७–२८
प्रकीर्णाधिकारः १३, ४१–२
ज्ञानकाण्डः पृ १५४–१५५
७. विमानार्चनाकल्पः पृ. ३७२–३७५
८. प्रकीर्णाधिकारः १६, ४०–८२

विव्रियन्ते।

अन्तर्यामी

अन्तर्यामी नाम हृत्पद्मकर्णिकामध्यगताङ्गुष्ठमात्रवैश्वानरशिखामध्यतेजोभासुरस्वरूपविशेषः परमात्मा भवेत्।

नीवारशूकवत्तन्वी पीताभा स्यात्तणूपमः तस्याः शिखामद्ये परमात्मा व्यवस्थितः ।
अन्तः प्रविषृश्शास्ता जनानाम्

इत्यादि श्रुतिवाक्यानामाधारेण हृदयमध्ये ज्योतिः प्रज्वलति। ज्योतिमध्ये विराजमानतेजोभासुरमूर्तिः अन्तर्यामी भवति।

स्वसंकल्पविशेषेण तप्तजाम्बूनदप्रभः पीताम्बरधरः सौम्यः सुप्रसन्नः शुचिस्मितः पद्माक्षः रक्तनेत्रास्यपाणिपादश्चतुर्भुजः शङ्खचक्राभयधरः कटिन्यस्तवामहस्तः श्रीवत्साङ्कः महाबाहुः सर्वाभरणभूषितः सर्वात्मा श्रीभूमिभ्यां पार्षदैश्चः सहितः सर्वकारणकारणभूतः स च अन्तर्यामी भवेदिति प्रोच्यते वैखानसागमे[१]।

पाञ्चरात्रागमे[२] तावत् अन्तर्यामित्वं नाम स्वर्गनरकादिषु कर्मानुभवदशायामपि योगिभिरेव प्रेक्षाणीयस्सन् जीवस्य हृदयदेशे विद्यमानो रूपविशेषः भवेत्। जीवेन सह जीवगतदोषाः अन्तर्यामिनः न स्पृशन्ति। स्वरूपमात्रव्याप्तिः दिव्यमङ्गलविग्रहविशिष्टस्वरूपव्याप्तिरिति च अन्तर्यामित्वं द्विविधम्। आश्रितानाश्रिततारतम्यं विना समस्तचेतनाचेतनेषु व्यापकीभूता व्याप्तिः स्वरूपमात्रव्याप्तिरिति, सज्जनहृदयेष्वेव विद्यमाना भगवतः व्याप्तिः विग्रहविशिष्टव्याप्तिरिति परिगण्यते इति अन्तर्यामिरूपस्य वर्णनम् उभयोः वैष्णवागमयोः दरीदृश्यते।

अर्चा

भगवतः श्रीमन्नारायणस्य परादिपञ्चावतारेषु अन्तिमः अर्चावतारः। अयं च अर्चावतारः मोक्षेच्छुकानामाध्यात्मिकतत्त्वज्ञानानाञ्च साधनभूतः। भक्तः सुलभरूपेण भगवन्तं साक्षात्कर्तुं भगवतः रूपं मनसि स्थापयितुमर्चावतार एव प्रधानसाधनं भवतीति आगमग्रन्थाः कथयन्ति। अर्चा नाम प्रतिमावाचकः। आश्रिताभिमतलोहशिलादारुद्रव्येषु अन्यतमेन कल्पितस्य अप्राकृतदिव्यशरीरेण स्नानभोजनासनशयनस्थितिसर्वं सहिष्णुः गृहग्रामनगरशैलादिप्रदेशेषु परिपूर्णवर्तमानमूर्तिविशेषो अर्चारूपः[३]।

सुरूपां प्रतिमां विष्णोः प्रसन्नवदनेक्षणाम्
कृत्वाऽत्मनः प्रीतिकरीं सुवर्णरजतादिभिः।

---

१. प्रकीर्णाधिकारः ३३, २३-३०

२. यतीन्द्रमतदीपिका पृ. १४०-१४१

३. यतीन्द्रमतदीपिका पृ. १४१

तामर्चयेत्तां प्रणमेत्तां नमेत्तां विचिन्येत्
विशत्यपास्तदोषस्तु तामेव ब्रह्मरूपिणीम्॥[१]

इति वाक्येन आत्मनः प्रीतिः अस्माभिः येन साधिता सः सुवर्णरजतादिभिः कल्पितः भगवतः विष्णोः प्रतिमाविशेषः एव।

निर्विकारस्य भगवतः करचरणावयवादिभिः दिव्यमङ्गलविग्रहं परिकल्प्य आलये प्रतिष्ठाप्य तेन साकाररूपेण भगवत् शक्तयः द्रष्टुं पुण्यलोकान् साधयितुमपि अयं च अर्चावतारः प्रधानसाधनभूतः इति वक्तुं नास्ति संशीतिलेशः।

अर्चारूपस्य श्रीमन्नारायणस्य रूपदर्शनेनैव पापानि सर्वाणि दूरतः गच्छन्ति। आध्यात्मिकशक्तिः आगमिष्यति। चञ्चलचित्तस्य मनसः अचञ्चलत्वमागच्छति। शरीरे पापधूलिः या अस्ति सा तत् क्षणादेव निर्गच्छति। भगवतः अर्चावतारस्य उपयुक्ता तीर्थजलपानेन अधिकान् रोगान् सर्वान् निर्गत्य आरोग्यमागमिष्यति। भगवतः प्रणामकरणेन योगशास्त्रानुष्ठानफलमपि सिध्यति। अर्चावतारस्याभिमुखे क्रियमाणानां नाट्यादिकलानां कर्मणां प्रभावेन भारतीयसंस्कृतिसम्प्रदायपरिरक्षणं च साधयामः।

अयं च अर्चारूपः सर्वथाः तृप्तिकरः सर्वसिद्धिप्रदः मनसः प्रीतिकरः भवतीति अर्चास्वरूपस्य वैशिष्ट्यमपि उपदिश्यते वैष्णवागमयोः।

उपसंहारः

परमात्मनः श्रीमन्नारायणस्य पर-व्यूह-विभव-अन्तर्यामी-अर्चास्वरूपवर्णनेन सर्वोत्तमत्वं सर्वोत्कृष्टत्वं सर्वातिशायित्वं ज्ञानशक्त्यादिषाड्गुण्यपरिपूर्णत्वं च वर्ण्यते वैष्णवागमयोः।

सर्वैः ज्ञायते यत् भगवान् परमात्मा भक्तजनसंरक्षणदीक्षादक्षस्सन् व्यूहरूपेण, विभवरूपेण, अन्तर्यामित्वेन अर्चास्वरूपेण च भक्तेभ्यः सुलभोपायरूपेण भूत्वा सर्वाननुगृह्णातु इति वैष्णवागमोपदेशसार इति।

स वा एष पुरुषः पञ्च वा पञ्चात्मा (महानारायणोपनिषत्. १७, १४) इति

श्रुतिवाक्यसमन्वयेन विष्णोः परादिपञ्चरूपाणि मया अत्र विशदीकृतानि। सहृदयहृदयाह्ला-दाध्यात्मिकतरङ्गशेखराणां विदुषामयं शोधलेखः विष्णोः स्वरूपलीलावैभवविज्ञानसर्वस्वो भवतु इति आशास्य विरम्यते।

इदं विष्णुर्विचक्रमे।

---

१. प्रकीर्णाधिकारः ३३, ४४-४५

न्याये श्रीपुरुषोत्तमविमर्शः

डॉ. कमलेशमिश्रः

मानज्योतिरपनोदिताविद्याव्राते पुरजिदनुग्रहीतान्तरात्मनि[१] सर्वविद्यानां मूलस्तम्भभूते[२] उत्सारित-कुतार्किककुतर्कविप्लावितप्रामाण्ये वेदप्रामाण्यरक्षाव्रतेऽक्षपादोपदिष्टे न्यायशास्त्रे न्यायोद्गारगभीरनिर्मलगिरा आराधितो विश्राणितकुसुमाञ्जलिचरणो विरतविप्रलिप्सापरम्पराकोलाहलो नूतनजलधररुचिर्गोपवधूटीदु-कूलचौरो[३] भूतभव्यभवत्प्रभुः परमात्मा श्रीकृष्ण एव पुरुषोत्तमः–

किं ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम।
अधिभूतं च किं प्रोक्तमधिदैवं किमुच्यते[४]।।

इत्यत्र पुरुषोत्तमपदेनार्जुनसम्बोधितश्रीकृष्णस्य प्रतीतेः । न च विश्वनाथपञ्चाननेन कारिकावल्यां समाराधितेऽपि श्रीकृष्णे न्यायसिद्धान्तमुक्तावल्यां "भवो भवतु भव्याय लीलाताण्डवपण्डितः" इत्येन मङ्गलश्लोकेन शिवस्य सपर्यादर्शनात् श्रीकृष्णशिवयोः कस्य पुरुषोत्तमत्वमिति वाच्यम्, "एकं सद्विप्रा बहुधा वदन्ति"[५] इति श्रुतिप्रामाण्यात् तत्र वस्तुतो भेदाभावात्, नैयायिकैः परमात्मनो बहुत्वानभ्युपगमाच्च।

किञ्चासंसारं प्रसिद्धानुभावो भगवान् भवो विभिन्ननाम्ना व्यपदिश्यते "इह यद्यपि यं कमपि पुरुषार्थमर्थयमानाः शुद्धबुद्धस्वभाव इत्यौपनिषदाः, आदिविद्वान् सिद्ध इति कापिला" इत्यादेराचार्योदयन-वचनस्य प्रामाण्यात्[६] ।

प्रसिद्धोऽपि भगवान् श्रुतिस्मृतीतिहासपुराणेषु मन्तव्यो भवति–"आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इति श्रुतेः[७] । अतः–

---

१. जयन्ति पुरजिद्दत्तसाधुपादपवित्रिताः।
निदानं न्यायरत्नानामक्षपादमुनेर्गिरः।।४।। न्यायमञ्जरी, मङ्गलश्लोकः।

२. न्यायविस्तरस्तु मूलस्तम्भभूतः सर्वविद्यानां वेदप्रामाण्यरक्षाहेतुत्वात् । तत्रैव, प्रथमाह्निके ।

३. नूतनजलधररुचये गोपवधूटीदुकूलचौराय ।
तस्मै कृष्णाय नमः संसारमहीरुहस्य बीजाय।।१।। कारिकावली, मङ्गलश्लोकः।

४. श्रीमखगवद्गीता, ८–१

५. ऋग्वेदः, १–१६४–४६

६. न्यायकुसुमाञ्जलिः, प्रथमस्तबकः।

७. बृह., २–४–५

न्यायचर्येयमीशस्य मननव्यपदेशभाक्।
उपासनैव क्रियते श्रवणानन्तरागता[१] ॥ इति उदयनाचार्यभारती दिव्याति।

न्यायनये जीवात्मपरमात्मभेदेन द्वैविध्यमात्मनः । "आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्"[२] इति सूत्रे आत्मपदेनानित्यज्ञानाश्रयस्य नित्यस्य विभोः सुखदुःखसाधनस्य भोक्तुर्जीवात्मनो ग्रहणमिति बोध्यम्। जीवात्मनः शरीरावच्छेदे ज्ञानं, शरीरमन्तरेण न तज्ज्ञानोत्पत्तिः। आत्यन्तिकदुःखनिवृत्त्यर्थं जीवात्मा अपेक्षते तत्वज्ञानम्, निःश्रेयसः तत्वज्ञानजन्यतया सिद्धेः। साक्षान्मोक्षजनकत्वेन तद्वतितत्प्रकारकानुभवस्य ग्रहणेऽपि परम्परया परमात्मनः पुरुषोत्तमस्य ज्ञानमावश्यकम्। उक्तञ्च न्यायकुसुमाञ्जलौ हरिदास्याम् "ईश्वरमननञ्चादृष्टद्वारा आत्मसाक्षात्कारद्वारा वा मुक्तौ हेतुः, **तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय** इति श्रुतिस्तत्कारणत्वे मानम् । स्वात्मसाक्षात्कारस्य मोक्षहेतुत्वे मानञ्च–

आत्मानञ्चेद्विजानीयादहमस्मीति पुरुषः ।
किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेत्[३]॥ इति।

जीवानामनादिकालतः स्वस्वशुभाशुभकर्मजनितधर्मनिदानात् सुखदुःखभोगः। धर्माधर्मयोरचेतनतया चेतनाधिष्ठितत्वमन्तरेण न जीवकर्मफलभोगः। न च जीवस्यैव धर्माधर्माधिष्ठातृत्वम्, तस्य स्वकृतकर्मजनितधर्माधर्माधीनत्वस्वीकारात्। अतो जीवस्य शुभाशुभकर्मफलदातृत्वेन धर्माधर्मरूपस्यालौकिकस्य जीवात्मनिष्ठस्यादृष्टस्याधिष्ठातृत्वेन जीवातिरिक्तस्यैकचेतनपदार्थस्यावश्यम्भावितया तदधिष्ठातृतया चेतनस्य परमात्मनः पुरुषोत्तमस्य न्यायनये ग्रहणम्। परलोकादेरलौकिकहेतुर्वर्त्तते एव सापेक्षत्वादनादित्वाद्वैचित्र्याद्विश्ववृत्तितः प्रत्यात्मनियमाद् भुङ्क्तेः[४]। एतादृशस्यादृष्टस्याधिष्ठातृतया पुरुषोत्तमस्वीकारोऽवश्यमेव। नित्यज्ञानाश्रयोऽयं परमात्मपर्याय ईश्वरः प्राप्तसमस्तप्रापणीयः सर्वज्ञः प्राणिभृत्कर्मफलभोगाश्रयस्य विचित्रस्य जगतः[५] निमित्तकारणं पुरुषकर्माफल्यदर्शनात्[६] संसारमहीरुहस्य बीजाय[६] इति विश्वनाथपञ्चाननोक्तेः। नानाकर्मफलस्थानमिमं संसारं स्रष्टुं पेशलस्य परमात्मनः लोकोत्तरनिपुणतां विकल्पयितुं प्रभवति न कस्यापि चातुर्यम्[७]।

जगत्कर्तृत्वेनानुमानेन साध्यते ईश्वरसखावः। तच्चानुमानं कार्यत्वहेतुकम्। तदाकारश्च–

---

१. न्यायकुसुमाञ्जलिः, प्रथमस्तबकः, श्लोकः ३
२. न्यायसूत्रम्, १-१-९
३. बृ. उ., ४-४-१२
४. न्यायकुसुमाञ्जलिः, प्रथमस्तबकः, श्लोकः ४
५. न्यायमञ्जरी, आह्निकम्-४
६. न्यायसूत्रम्-४-१-१९
७. कारिकावली, मङ्गलश्लोकः-१
७. ''नानाकर्मफलस्थानमिच्छैवेदृशं जगत्।
स्रष्टुं प्रभवतस्तस्य कौशलं को विकल्पयेत्''। न्यायमञ्जरी, आह्निकम्-४

क्षित्यङ्कुरादिकं कर्तृजन्यं कार्यत्वाद् घटवादिति। कार्यञ्च चेतनकर्तृजन्यमिति व्याप्तिः। न च क्षित्यङ्कुरादिकं कर्तृजन्यं शरीराजन्यत्वादाकाशवदिति शरीराजन्यत्वेन कर्तृजन्यत्वसाधकेन सत्प्रतिपक्ष इति वाच्यम्, अप्रयोजकत्वात्। न च यदि कर्तृजन्यत्वं न स्यात्तर्हि शरीराजन्यत्वमपि न स्यादिति कर्तृजन्यत्वशरीराजन्यत्व- योर्व्याप्तिरनुपलम्भात्। परन्तु यदि कर्त्तृजन्यं न स्यात्तर्हि कार्यत्वमेव न स्यादिति कर्त्तृजन्यत्वकार्यत्वयोः कार्यकारणभावदर्शनादनुकूलतर्कास्त्विवं स्पष्टम्। किञ्च द्यावाभूमी जनयन् देव एको विश्वस्य कर्त्ता भुवनस्य गोप्ता इत्यादय आगमा अप्यनुसन्धेया इति। अत्र कर्तृत्वञ्चोपादानगोचरापरोक्षज्ञान-चिकीर्षाकृतिमत्त्वम्। एतादृशं कर्त्तृत्वञ्च मितज्ञानशक्तिमत्त्वान्नास्मदादीनां किन्तु सकलकार्यकारणज्ञानवत् इच्छामयस्य परमात्मनः ।

न्यायकुसुमाञ्जलौ अव्ययो विश्वजित्पुरुषोत्तमः कार्यायोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेर्वाक्यात् संख्याविशेषाच्च साधित आचार्येणोदयनेन[१]।

आरम्भवादिभिर्नैयायिकवैशेषिकैः परमाणुतः कार्यद्रव्योत्पत्तिः स्वीक्रियते। सृष्टेः प्रारम्भे जीवात्मनां सञ्चितादृष्टराशेः फलोन्मुखत्वे तं परमाणुसमूहस्पन्दनञ्च सहकारिकारणत्वेनावलम्ब्य "एकोऽहं बहुस्यां प्रजायेय" इति श्रुत्यनुसारेण जायते सिसृक्षा परमेश्वरस्य। तया द्रव्यारम्भकसंयोगानुकूलपरमाणुसमूह-क्रियोत्पत्तिः। एत्क्रियारूपस्पन्दनात्परमाणुद्वयसंयोगाद्द्वयणुकोत्पादः। अनेन प्रकारेण द्वयणुकत्रयस्य संयोगात् त्र्यणुकम्। त्र्यणुकचतुष्टयसंयोगाच्चतुरणुकमित्येव। अनेन प्रकारेण परमाणुतो जगत्सृष्टिः अचेतनानां परमाणूनां स्वतो जगन्निर्माणार्थं सामर्थ्याभावात्तेषामायोजकत्वेनेश्वरोऽनुमेयः। अनुमानञ्चात्र परमाण्वादयश्चेतनायोजिताः प्रवर्त्तन्ते अचेतनत्वाद्वास्यादिवदिति। एवं धृत्यादिनापीश्वरसिद्धिः।

अयं परमात्मा अशरीरो विभुश्च। न्यायवैशेषिकसिद्धान्ते नित्यज्ञानेच्छाकृतीनामीश्वराश्रयत्वम्। किन्तु इच्छां कृतिं वा प्रति इष्टसाधनताज्ञानस्यैव कारणतया ईश्वरस्य च स्वीयप्रयोजनाभावात् कथं तस्य इच्छाप्रयत्नौ इति चेन्न, जीवात्मनिष्ठागन्तुकेच्छाप्रयत्नौ प्रतीष्टसाधनताज्ञानस्य कारणत्वाङ्गीकारात्, न त्वीश्वरनिष्ठयोरनागन्तुकेच्छाप्रयत्नयोः कृते। करुणया परमेश्वरस्य जीवभोगार्थं सृष्टिः।

अत्रायं सारः–

१. जगत्कर्त्तृत्वेन पुरुषोत्तमसिद्धिः।

२. न्यायनये पुरुषोत्तम एकः, एकपदस्य च कैवल्यादिविशिष्टे शक्तिः। कैवल्यञ्च सजातीयद्वितीयरहित्तवम् । तच्च सजातीयनिष्ठभेदाप्रतियोगित्वम् ।

३. जीवपुरुषोत्तमयोरनुग्राह्यग्राहकभावसम्बन्धः।

४. उपासनया जीवस्येश्वरानुग्रहलाभे सामर्थ्यम्। तदनुग्रहात् पुरुषार्थकैवल्यं संघटते।

५. पुरुषोत्तम इत्यत्र पुरुषेभ्य उत्तमः, पुरुषेषूत्तमो वेति न्यायनये विग्रहदृष्ट्या मतभेदेऽपि उत्तमत्वं तत्र सर्वज्ञत्वमिति स्पष्टम्।

६. पुरुषोत्तमभिन्नानां रागादिभिः स्पृष्टानां पुंसामसर्ववित्त्वमेव।

७. संसारजालबद्धानां जीवानां परमेश्वरः।
मुक्त्यर्थं शरणं तावन्न्याये श्रीपुरुषोत्तमः।। इति।

१. न्यायकुसुमाञ्जलिः, पञ्चमस्तबकः, श्लोकः १

काव्यशास्त्रे रसानां सुखदुःखात्मकताविचारः

श्रीकुन्दनकुमारः

काव्यशास्त्रीयोऽयमतिमहिमशाली विवादास्पदीभूतः प्रश्नः। रसः काव्यास्वादो वाऽऽनन्दमय इति निर्विवादः। किन्तु तस्यानन्दमयत्वमपरिहार्यमित्यत्र विदुषां न मतैक्यम्। 'अनुकूलवेदनीयं सुखं प्रतिकूलवेदनीयं दुःखम्' इति सर्वमान्यः शास्त्रीयसिद्धान्तः रसानुभूतिविषये सर्वथा विचारणीयो वर्तते। काव्यानुभूतिः सर्वथा दुःखात्मिका इति तु केऽपि न प्रतिपादयन्ति परन्तु रसः केवलं सुखात्मकः सुखदुःखोभयात्मको वेति प्रश्नः अवश्यं विचारणीयः।

आचार्यभरतः विभावानुभावव्यभिचारिसंयोगादेव रसनिष्पत्तिं प्रमाणयति, अतः रसस्य भावाश्रितत्वं मुनेः सम्मतम्। नूनं रसो भावाश्रितः, भावभूमिकामन्तरा न सम्भवति सा रसस्थितिः संस्कृतकाव्यशास्त्रस्यायं सर्वथा निर्भ्रान्तः सिद्धान्तः। भावस्पर्शशून्यः शब्दार्थचमत्कारो न रस इत्यत्र स्वयमलङ्कारवादिनोऽपि न विप्रतिपद्यन्ते। काव्ये रसभावयोरपरिहार्योऽविच्छिन्नः सम्बन्ध इति नाट्यशास्त्रमपि प्रमाणयति–

'न भावहीनोऽस्ति रसो न भावो रसवर्जितः' इति।[१]

परं लोकव्यवहारे भिद्यते रसानुभूतिर्भावानुभूतेः। रसाश्रयभूताः स्थायिभावाः सामान्येन द्विविधा भवन्त्यास्वादात्–रत्युत्साहविस्मयहास्यशमानामास्वादः सुखदः शोकक्रोधभयजुगुप्सा– नामास्वादश्च दुःखदो लोके। यथाहि–

रतिहासोत्साहविस्मयानां सुखस्वभावत्वम्।
क्रोधभयशोकजुगुप्सानां तु दुःखरूपता॥[२]

रसस्य सर्वथानन्दरूपत्वे स्वीकृते रसानुभूतिभावानुभूत्योरयं भेदः स्वतः सिध्यति। करुणरसस्यानुभूतिः खल्वानन्दमयी, शोकस्य च सा दुःखमयी। बीभत्सरसोऽन्ततः सुखदचेतनात्मकः जुगुप्सा तु दुःखदा। अत्र शृङ्गारवीरहास्यादिषु सन्देहं कर्तुं शक्यते यत् तेषां स्थायिभावानामप्यनुभूतिः सुखदा भवति। यथा लोकगतकाव्यगतयोः प्रेमप्रसङ्गयोर्हास्य–प्रसङ्गयोश्चैकरूपतायां नियमेन भ्रान्तिः सम्भवति।

---

१. ना. शा., अ. ६, का. ३७
२. हि. अभि. भा. पृ. २१९,२०

१. भरतः – प्रस्तुतप्रसङ्गे सर्वतः प्रथममैतिहासिकक्रमप्राप्तत्वात् भरतमतं पर्यालोचनीयम्-

'यथा हि नानाव्यञ्जनसंस्कृतमन्नं भुञ्जाना रसानास्वादयन्ति सुमनसः पुरुषा हर्षादींश्चाधिगच्छन्ति तथा नानाभावाभिनयव्यञ्जितान् वागङ्गसत्त्वोपेतान् स्थायिभावानास्वादयन्ति सुमनसः प्रेक्षका हर्षादींश्चाधिगच्छन्ति तस्मान्नाट्यरसा इत्यभिव्याख्याताः।'[१]

अत्र हर्षादीत्यादि पदमाधृत्य विरोधिनो विद्वांसः सिसाधयिषन्ति यन्न केवलानन्दरूपोऽयं रसास्वादः। स्थायिभावास्वादमनु सोऽन्यथापि भवति। परं भरताभिप्रेतं नेदं मतम्। यथा स्वस्थाः पुरुषाः नानाव्यञ्जनसंस्कृतमन्नमास्वादयन्ति तथा प्रसन्नचेतसः प्रेक्षका अभिनयसम्पृक्तान् स्थायिभावान्। यथा चान्नभोक्तारस्ते हर्षादीननुभवन्ति तथा रसभोक्तारः प्रेक्षका अपि हर्षादींश्चानुभवन्ति। यथा सुस्वादुभोजने हर्षविपरीता दुःखक्षोभादयोऽप्रीतिकरा विकारा न भवन्ति न च सम्भवन्ति। तथैव रसास्वादस्याप्यनुभूत्यात्मकं रूपमानन्दमयमेव भवति, न तु दुःखक्षोभादिमयमित्यर्थः। अस्मिन् विषये भरतस्य मतानुसारं लोके ये सुखदुःखात्मकस्वभावाः भवन्ति ते एव नाट्ये साधारणीकरणव्यापारेण आनन्दमयः आस्वाद्य वा भवति। यथाहि-

योऽयं स्वभावो लोकस्य सुखदुःखसमन्वितः।
सोऽङ्गाद्यभिनयोपेतो नाट्यमित्यभिधीयते॥[२]

अतो भरतमते रसस्य सुखदुःखयोभयात्मकत्वं न सिध्यति। नैवानन्दमयतायाः प्रतिषेधो भवति।

२. आनन्दवर्धनः – स्वग्रन्थे ध्वन्यालोके 'शोकः श्लोकत्वमागतः' इति प्रतिपादयता श्रीमदानन्दवर्धनाचार्येण काव्यं सामान्यरूपेण सहृदयहृदयाह्लादकमित्युक्तम्। कवेः अन्तःकरणे पुञ्जीभूतस्य शोधकस्याभिव्यक्तिरूपकाव्यस्यानुभूतिः प्रेक्षकाय पाठकाय वा दुःखात्मकं न भवति।

३. अभिनवगुप्तः – भरतसूत्रव्याख्याताभिनवगुप्तोऽपि पुष्णातीदमेव मतम्-

'अन्ये त्वादिशब्देन शोकादीनामत्र सङ्ग्रहः। स च न युक्तः। सामाजिकानां हि हर्षैकफलं नाट्यं न शोकादिफलम्। तथात्वे निमित्ताभावात् तत्प्रसङ्गाच्चेति मन्यमाना हर्षांश्चाधिगच्छन्तीति पठन्ति।'[३]

अत्र नाट्यस्य शोकादिफलत्वे प्रमाणं नास्ति, सति च तस्मिन् सामाजिकानां शोकाद्यनभीष्टभावोदयः स्यादितिभावः।

अभिनवगुप्तः स्थायिभावेष्वेव सुखदुःखरूपतां मन्यते न तु रसेषु। तन्मतानुसारम्-आनन्दमयज्ञानस्वरूपात्मन एवास्वादनं रसरूपे भवति। अतः तत्र दुःखशङ्का न संभवति। यथाहि-

१. ना. शा., अ. ६
२. हि. अभि. भा. (विश्वेश्वर) पृ. २१९
३. हि. अभि. भा. (विश्वेश्वर) पृ. ५००

'अस्मन्मते तु संवेदनमेवानन्दघन आस्वाद्यते। तत्र का दु:खशङ्का?'

४. **भट्टनायक:** – भारतीयकाव्यशास्त्रे किलाचार्याणां बहुमतोऽयमेव पक्ष: आचार्याभिनवात्पूर्वं भट्टनायकेनोत्पत्तिप्रतीत्यनुमितिप्रभृतिसिद्धान्तान्निरस्यता ये तर्का उपस्थापितास्तेष्वयं प्रमुख: यदि रस उत्पद्यत इति मन्यते तदा शोकाच्छोक एवोत्पद्येत, शोकाद्यभिनयं पश्यत: सामाजिकस्य च दु:खमेव स्यात्, अर्थात् करुणरसस्यास्वादो दु:खमय एव स्यात् अस्मिन् सन्दर्भे अभिनवगुप्त: अभिनवभारत्यां भट्टनायकस्य मतमुद्धरति–

'रसो न प्रतीयते नोत्पद्यते नाभिव्यज्यते। स्वगतत्वेन हि प्रतीतौ करुणे दु:खित्वं स्यात्। न च सा प्रतीतिर्युक्ता। सीतादेरविभावत्वात्। स्वकान्तास्मृत्यसंवेदनात्।'[१]

अभिनयकाले विभावरूपेण सीतादे: अभाव: भवति। स्वपत्न्या: स्मृतिरपि न भवति। इत्थं भट्टनायक: अभिनवगुप्तस्य मतं समर्थयन् करुणरसस्य दु:खमयतां प्रतिषिध्य रसमात्रस्याऽऽनन्दमयतां निर्विवादरूपेण प्रतिष्ठापितवान्।

५. **मम्मट:** – आचार्यमम्मट: काव्यप्रकाशस्य मङ्गलाचरणे नवरसरूचिरामित्युक्त्वा रसस्यानन्दमयतामेव प्रतिपादयति। तेन रस एव सकलप्रयोजनमौलिभूतस्तदास्वादश्चानन्दमय इति प्रतिपादितम्–

'सकलप्रयोजनमौलिभूतं समनन्तरमेव रसास्वादनसमुद्भूतं विगलितवेद्यान्तरमानन्दम्।'[२]

६. **धनिक:** – दशरूपकटीकाकृद्धनिक: केनापि विलक्षणेन दृष्टान्तेन रसमात्रस्य सुखरूपतामसाधयत्। तन्मतानुसारं करुणात्मककाव्यश्रवणाद् रसिकानां दु:खानुभूति: अश्रुपातादयश्च भवन्ति परञ्चेदं लौकिककरुणापेक्षया तथैव भिन्नं यथाहि सुरतलीलायां दन्तनखक्षतादिभिरप्यानन्दानुभूतिरेव जायते। यद्येवं स्याच्चेत्तर्हि करुणात्मककाव्येषु न कस्यापि प्रवृत्तिर्जायते तथा करुणरसप्रधानरामायणादिकाव्यानामुच्छेद: स्यात्। वस्तुत: करुणप्रसङ्गात् सामाजिकानाम् अश्रुपातादय: आनन्दानुभूते: विरोध: नास्ति। यथाहि दशरूपकटीकायां धनिक: वर्णयति–

'ननु च युक्तं शृङ्गारवीरहास्यादिषु प्रमोदात्मकेषु वाक्यार्थसम्भेदात् आनन्दोद्भव इति करुणादौ तु दु:खात्मके कथमिवासौ प्रादु:स्यात्? तथाहि – तत्र करुणात्मककाव्यश्रवणाद् दु:खाविर्भावोऽश्रुपातादयश्च रसिकानामपि प्रादुर्भवन्ति। न चैतदानन्दात्मकत्वे सति युज्यते। सत्यमेतत्। किन्तु तादृश एवासावानन्द: सुखदु:खात्मको तथा प्रहरणताडनादिषु सम्भोगावस्थायां कुट्टमिते स्त्रीणाम्, अन्यश्च लौकिकात्करुणकाव्यात्करुण:। तथाहि–अत्रोत्तरोत्तरं रसिकानां प्रवृत्तय:। यदि च लौकिककरुण–

१. हि. अभि. भा. (विश्वेश्वर) पृ. ५०७

२. का. प्र. १/२

वद्दु:खात्मकत्वमेवेह स्यात्तदा न कश्चित्तत्र प्रवर्तेत, ततः करुणैकरसानां रामायणादिमहाप्रबन्धानामुच्छेद एव भवेत्। अश्रुपातादयश्चेतिवृत्तवर्णनाकर्णनेन विनिपतितेष्टलौकिककवैक्लव्यादिवत् प्रेक्षकेषु प्रादुर्भवन्तो न विरूध्यते। तस्माद्रसान्तरवत्करुणस्याप्यानन्दात्मकत्वमेव।'[१]

७. **विश्वनाथः** - रसवादिनो कविराजविश्वनाथस्य मतं तु सर्वथैव निर्भ्रान्तम्। स करुणरसे सुखात्मकतायाः प्रतिपादनविषये लिखति-

करुणादावपि रसे जायते यत्परं सुखम्।
सचेतसामनुभवः प्रमाणं तत्र केवलम्॥

किञ्च तेषु यदा दुःखं न कोऽपि स्यात्तदुन्मुखः।
तथा रामायणादीनां भविता दुःखहेतुता॥

हेतुत्वं शोकहर्षादेर्गतेभ्यो लोकसंश्रयात्।
शोकहर्षादयो लोके जायन्तां नाम लौकिकाः॥

अलौकिकविभात्वं प्राप्तेभ्यः काव्यसंश्रयात्।
सुखं सञ्जायते तेभ्यः सर्वेभ्योऽपीति का हानिः॥
अश्रुपातादयस्तद्वद् द्रुतत्वाच्चेतसो मताः॥[२]

एवं प्रकारेण रसानुभूतिस्वरूपमाचक्षते -

सत्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः।
वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः॥

लोकोत्तरचमत्कारप्राणः कैश्चित्प्रमातृभिः।
स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः॥[३]

८. **जगन्नाथः** - पण्डितराजजगन्नाथः रसं सर्वथा सुखात्मकं मन्यते। तस्येदं मतम्-

''रसो वै सः, रसं ह्येवायं लब्ध्वानन्दीभवति इति श्रुति, सकलहृदयप्रत्यक्षं चेति प्रमाणद्वयम्।''[४]

अत्र प्रथमं प्रमाणं यत् आत्मा रसरूपः आनन्दमयश्च। द्वितीयं प्रमाणं सहृदयसमाजस्य प्रत्यक्षानुभवः।

---

१. द. रू. ४/४४-४५ (धनिकटीका)
२. सा. द. ३/४,५,६,७
३. सा. द. ३/२,३
४. र. ग. (मथुरानाथ शास्त्री टीका) प्र. आ., पृ. २७

करुणरसप्रसङ्गे भगवल्लीलाप्रसङ्गे वा अश्रुपातादिकं स्वाभाविकमानन्दानुभवमङ्गीकरोति जगन्नाथः। तन्मतानुसारमप्रयोज्या अरमणीया अपि शोकादयः पदार्थाः काव्येष्वलौकिकमाह्लादं जनयन्ति। यथाहि–

'केवलाह्लादवादिनां तु प्रवृत्तिरप्रत्यूहैव। अश्रुपातादयोऽपि तत्तदानन्दानुभवस्वाभाव्यात्। न तु दुःखात्। अत एव भगवद्भक्तानां भगवद्वर्णनाकर्णनादश्रुपातादय उपपद्यन्ते। न हि तत्र जात्वपि दुःखानुभवोऽस्ति।

न च करुणरसादौ स्वात्मनि शोकादिमद्दशरथादितादात्म्यारोपे यद्याह्लादस्तदा स्वप्नादौ सन्निपातादौ वा स्वात्मनि तदारोपेऽपि स स्यात्। आनुभविकं च तत्र केवलं दुःखम्। इतीहापि तदेव युक्तमिति वाच्यम्। अयं हि लोकोत्तरस्य काव्यव्यापारस्य महिमा, यत्प्रयोज्या अरमणीया अपि शोकादयः पदार्था आह्लादमलौकिकं जनयन्ति। विलक्षणो हि कमनीयः काव्यव्यापारज आस्वादः प्रमाणान्तरादनुभवात्।'[१]

९. रामचन्द्रगुणचन्द्रौ –एतयोः अनुसारं केचन् रसाः सुखात्मकाः केचन् दुःखात्मकाः च भवन्ति–

'सुखदुःखात्मको रसः'[२]

तत्रेष्टविभावादिप्रकाशितस्वरूपसम्पत्तयः शृङ्गारहास्यवीराद्भुतशान्ताश्चत्वारः सुखमया अनिष्टविभावादिसमासादितस्वरूपाः करुणरौद्रबीभत्सभयानकाश्चत्वारश्च दुःखमया रसा भवन्तीति।

एतयोः सर्वेषां रसानां सुखात्मकत्वं कदाचिदपि नाभिमतम्–यदिदं सर्वेषां रसानां सुखमयत्वमुच्यते तत्प्रतीतिविरुद्धत्वात्। काव्यनाटकयोः लौकिकाचारव्यवहारस्य चित्रणं यथार्थरूपेण भवति। कविः सांसारिकसुखानां वर्णनं सुखरूपेण दुःखानां च दुःखरूपेण वर्णयति। रामस्य विरहदशा निश्चयेन दुःखात्मिका भवति। यदि नाटकस्यानुकरणं सुखात्मकं मन्यते चेत् तत् अनुकरणं यथार्थं न भवति।

सुखास्वादात् कोऽपि नोद्विग्नः भवति परञ्च करुणादिरसेषु सामाजिकानां मनः उद्विग्नं भवति। यद्येवं नो चेत्तर्हि सीताहरणादिकरुणाभिनयदृश्यैः कः सहृदयः सुखास्वादमनुभवेत्?

यद्यपि एतावाचार्यौ सर्वेषां रसानामास्वादं सर्वथा सुखात्मकं न स्वीकुरुतः। परन्तु अन्यैराचार्यैः बहुभिरालोचितमिदमं मतम्।

१०. रुद्रभट्टः – आचार्यरुद्रभट्टोऽपि स्वग्रन्थे 'रसकलिकायाम्' एकत्र रसस्युभयात्मकप्रकृतेः निरूपणमकरोत्–

'करुणामयानामप्युपादेयत्वं सामाजिकानाम्, रसस्य सुखदुःखात्मकतया तदुभयलक्षणत्वेन उपपद्यते। अतएव तदुभयजनकत्वम्।'[३]

---

१. र. ग., प्र. आ. (मधुसूदन शास्त्री) पृ. १३९
२. ना. द. पृ. २९०
३. रसकलिका, मैन्युस्क्रिप्ट्स इन द मद्रास गवर्नमेण्ट ओरियेण्टल मैन्युस्क्रिप्ट लाइब्रेरी, पृ. ५१,५२

११. भोजः - भोजः शृङ्गारप्रकाशे रसं सुखदुःखरूपात्मकं वर्णयति-

'रसा हि सुखदुःखावस्थारूपाः।'[१]

१२. वामनः - वामनस्य कथनानुसारं करुणरसात्मकनाटकेषु सहृदयानां सुखदुःखयोः मिश्रितानुभूतिः भवति-

करुणप्रेक्षणीयेषु सम्प्लवः सुखदुःखयोः।
यथाऽनुभवतः सिद्धस्तथैवौजः प्रसादयोः॥[२]

१३. मधुसूदनसरस्वती - तन्मतानुसारं रसेषु आनन्दः समानरूपेण नानुभूयते। आदौ सांख्यमतानुसारेण रसेषु सत्त्व-रज-तमा इत्येतेषां मात्रानुसारम् आनन्दमयतां स्वीकरोति-

'द्रवीभावस्य सत्त्वधर्मत्वात्, तं विना स्थायिभावासम्भवात्, सत्त्वगुणस्य च सुखरूपत्वात्, सर्वेषां भावानां सुखमयत्वेऽपि रजस्तमोऽंशमिश्रणात् तारतम्यमवगन्तव्यम्। अतो न सर्वेषु रसेषु तुल्यसुखानुभवः।'[३]

क्रोधशोकभयादीनां साक्षात् सुखविरोधिनाम्।
रसत्वमभ्युपगतं तथानुभवमात्रतः॥[४]

परन्तु सांख्यमतं परित्यज्य मधुसूदनसरस्वती अद्वैतदर्शनाधारेण प्रतिपादयति यत् संसारे भावः सुखदुःखमोहात्मकप्रकृतिकः भवति, किन्तु काव्ये सामाजिकानां हृदये वा सर्वेऽपि रसाः आनन्दात्मकाः भवन्ति-

बोध्यनिष्ठा यथास्वं ते सुखदुःखादिहेतवः।
बोद्धृनिष्ठास्तु सर्वेऽपि सुखमात्रैकहेतवः॥[५]

१३. आधुनिकाचार्याः - संस्कृतकाव्यशास्त्रस्य परम्परा आधुनिकभारतीयभाषासु अप्रतिहतरूपेणागता। विशेषतः हिन्दीभाषायां रीतिकाले नैके विद्वांसः रससिद्धान्तविषयक-व्यापकचिन्तनमकुर्वन्। प्रायशः सर्वेषां रीतिकालिकाचार्यानामनुसारं रसः अलौकिकः आनन्दस्वरूपः ब्रह्मानन्दसहोदरश्चास्ति।

---

१. रसों की संख्या, पृ. १४७
२. का. सू. वृ. ३/१-९
३. भ. र. पृ. २२
४. भ. र. II. ७९
५. भ. र. III. ५

आधुनिका आलोचका अपि बहुधा रीतिवादीनामेव मतं मन्यन्ते। आचार्यकेशव प्रसादमिश्र–पण्डितरामदहिनमिश्र–डॉ.भगवानदास–डॉ.श्यामसुन्दरदास–डॉ.गुलाबरायाचार्यहजारी– प्रसादद्विवेदिनः सर्वेऽपि रसस्यानन्दरूपतां मन्यन्ते। परन्तु अत्र केवलमाचार्यरामचन्द्रशुक्ल एव प्रबलोऽपवादः। भारतीयशास्त्रपरम्परायाः विशेषाद्रसवादस्यातिसमर्थेन समर्थकेनाप्यनेन रसस्यानन्दरूपता स्फुटं विरोधिता। तथाहि–

'यदि सामाजिकहृदयेऽपि प्रदर्श्यमानो भावो नोदितः, तस्य भावस्य स्वानुभूतिविलक्षणप्रकारकः कश्चिदानन्दोऽनुभूतः, तदा कीदृशमिदं साधारणीकरणं स्यात्? क्रोधशोकजुगुप्सादिव्यञ्जकान्यपि वर्णनानि यदि श्रोतृहृदयान्तरानन्दमेव सञ्चारयेयुस्तदा श्रोतुरसहृदयता वा कवेरननुभूतभावप्रदर्शनजनितमपाटवं वा तत्र प्रतीयेत्।'[१]

स्वमतस्पष्टीकरणार्थं शुक्लमहोदयः तर्कमुपस्थापयति–'किमु मृतं पुत्रं पुरस्कृत्य विलपन्तीं शैव्यां शववस्त्रं याचमानस्य हरिश्चन्द्रस्य दर्शनश्रवणाभ्यां श्रोतृणामश्रूणि न प्रवर्तन्ते, किं नाम ते तत्र हसन्तो दन्तान् दर्शयति?'[२]

नूनमानन्दसिद्धान्तेऽसौ निर्ममतमः प्रहारः कृतः शुक्लमहोदयेन। परं डॉ. नगेन्द्रः अस्य प्रतिवादं कुर्वता स्वकीयमभिमतं प्रदर्शयति–

'सत्यहरिश्चन्द्रप्रेक्षणे प्रेक्षकस्य दन्तप्रकाशनं नेष्टमिति परमार्थः। परं किमसौ वाष्पाम्बुवर्षणाय तत्र समयं धनं च व्येति। नासीत्खल्वेकाङ्क्षिनी श्रीशुक्लदृष्टिः। इयं हि शङ्का तन्मनस्यपि जागरितासीत्, अतएव स्वप्रतिज्ञासिद्धये तेन रसस्वरूपं स्वमतानुरूपं नवीनतया व्याख्यातम्।'[३]

पाश्चात्यकाव्यशास्त्रेऽपि रसः आनन्दरूपः प्रतिपादितः। अस्मिन् सन्दर्भे प्रसिद्धदार्शनिकस्य अरस्तुमहोदयस्य 'विवेचनसिद्धान्तः' प्रसिद्धो वर्तते। त्रासात्मकपरिस्थितौ (Tragedy) अतिशयोत्तेजनाकारणतः मनोवेगानां शमनं विरेचनं (Katharsis) भवति–

"Tragedy then is an imitation of action that is serious, complete and of certain magnitude, in language embellished with each kind of artistic ornament, the several kinds being found in separate part of the play, inform of action not of narrative, through, pity and fear affecting the proper, katharsis or purgation of these emotions."[4]

---

१. रसमीमांसा, अनुवादः–अमीरचन्द्रशास्त्रीकृत रससिद्धान्ते पृ. ८८

२. तत्रैव

३. रससिद्धान्तः, पृ. ८८

४. Butcher-Aristotle's Theory of Poetry and Fine Arts.

महाराष्ट्रया अप्यालोचकाः रससिद्धान्तस्य विविधेषु पक्षेष्वतिगम्भीरं स्वतन्त्रञ्च चिन्तनं प्रास्तुवन्। तेषु द. के. केलकरेण रसध्वनिवादिनामाचार्याणामभिमतं रसस्यानन्दमयत्वं प्रतिपादितम्–

'काव्येन सहृदयहृदयसागर उल्लसति। अस्मिन्नुल्लसति हृदयसागरे यदा सहृदयो निमग्नस्तन्मयो वा भवति तदा तस्य तदाकारायां कृतौ निहित आनन्द एव संस्कृतसाहित्यकोविदै रसत्वेनोपदर्शितः।'[१]

डॉ. वाटवेरपि स्वकीये रसविमर्शे प्रस्तुतं प्रसङ्गं विस्तरेण विविच्य रसस्य सहृदयनिष्ठता-माह्लादमयताञ्चाभ्यमन्यत–

'कल्पनासाहाय्येनोपलब्धः किलाह्लादकोऽनुभव एव रसः। रसस्यास्य प्रसवित्री मूलसामग्री काव्यमेव भवति। अर्थादर्थान्तरेण रसः कारणरूपेण काव्येऽपि तिष्ठति। काव्ये किलोत्कटभावना-ललिताविष्कारेण सहृदयपाठकसुखसंवेदिनी समग्रप्रत्युत्तरात्मिका क्रिया रसनाम्ना व्यपदिश्यते।'[२]

ग. त्र्यं. देशपाण्डेरपि समर्थितम्मतमिदम्। अभिनवादिप्रतिपादित एवानन्दपक्षस्तस्याभिमतः–

'यावदस्मन्मतं जिज्ञास्यते। अस्माकं त्वभिनवाभिमतमेव पक्षः कारणबाहुल्येन स्वीकार्यः प्रतिभाति। अनेन हि सिद्धान्तेन समेषां काव्याङ्गानामुपयुक्तोपपत्तिः सम्भवति, अपरिहार्यतयाऽऽनन्दवाद एवास्माकं ग्राह्यः प्रतीयत इति निष्कर्षः।'[३]

आधुनिकभारतीयभाषासु पाश्चात्यभाषाष्वपि चास्मिन् विषये प्रभूतो विचारः कृतः क्रियते चाधुनापि। अलमतिकथनेन। निष्कर्षतया वक्तुं शक्यते यत् सर्वेषां रसानां सुखात्मकताप्रतिपादनपक्षे यावत् प्रबलयुक्तयः सन्ति तावन्न सुखदुःखात्मकताप्रतिपादने। यदि करुणादिरसाः सर्वथा दुःखात्मका अभविष्यन् तर्हि सहृदयाः करुणरसप्रधानकाव्येषु प्रवृत्ताः न अभविष्यन्। तेषु करुणादिरसेषु सहृदयानाकर्षयितुं गुणाः सन्ति। तस्मादेव सहृदयाः करुणादिप्रधानकाव्येष्वपि प्रवृत्ताः भवन्ति। वस्तुतः सहृदयहृदयः एव प्रमाणम्। प्रमाणयितुं तु दुष्करमेव। यतः –

करुणादावपि रसे जायते यत्परं सुखम्।
सचेतसामनुभवः प्रमाणं तत्र केवलम्॥[४]

---

१. रससिद्धान्तः पृ. ८९
२. रससिद्धान्तः, पृ. ८९
३. तत्रैव, पृ. ८९
४. साहित्यदर्पण ३/४

प्रो॰ रामानुज ताताचार्य द्वारा प्रणीत *'शाब्दबोधमीमांसा'* (प्रथम भाग): एक परिचय

डॉ. शशिप्रभा कुमार

I

प्रो॰ रामानुज ताताचार्य के प्रथम दर्शन का सौभाग्य मुझे जनवरी १९९६ में तिरुपति विद्यापीठ परिसर में परिचालित **'प्रकरण-पञ्चिका'** कार्यशाला की अवधि में हुआ। भारतीय दार्शनिक अनुसन्धान परिषद् द्वारा आयोजित इस कार्यशाला में आचार्यश्री के उद्‌बोधन एवं अध्यापन ने मुझे भारतीय दर्शन के पूर्वाचार्यों की उस परम्परा से परिचित कराया जो गूढ़ातिगूढ़ दार्शनिक तत्त्वों का हस्तामलकवत् साक्षात् ज्ञान कराने में समर्थ है। साथ ही, वैदुष्य एवं विनयशीलता, पाण्डित्य एवं सहजता के मणिकाञ्चन संयोग ने आपके अद्‌भुत व्यक्तित्व की एक अमिट छाप मेरे मन-मस्तिष्क पर अङ्कित कर दी जो अद्यावधि सर्वथा सजीव एवं सचित्र है। तर्कवाचस्पति, शास्त्ररत्नाकर एवं वाचस्पति आदि अनेकानेक उपाधियों से सुभूषित आचार्यप्रवर ने राष्ट्रिय संस्कृत विद्यापीठ, तिरुपति के कुलपति पद का गौरव बढ़ाया तथा कृतकृत्य होने के पश्चात् फ्रेंच इंस्टीट्यूट पाण्डिचेरी के अभ्यर्हित आचार्य पद को अलङ्कृत कर रहे हैं। व्याकरण, न्याय तथा मीमांसा के मूर्धन्य विद्वान् प्रो॰ ताताचार्य ने अनेक प्रौढ़ ग्रन्थों पर टीकायें लिखी हैं, जैसे– *नीलकण्ठप्रकाशिका, गादाधरी, पञ्चलक्षणी, चतुर्दशलक्षणी, पक्षता* एवं *अवयव* तथा *मुक्तावलीदिनकरी।* गङ्गेशोपाध्यायविरचित *तत्त्वचिन्तामणि* के प्रत्यक्षखण्ड पर आपकी *'प्रत्यक्षतत्त्व-चिन्तामणिविमर्श'* एक व्याख्यात्मक कृति है तो चिन्तामणि के प्रत्यक्षखण्ड एवं अनुमानखण्ड का आपने समालोचनात्मक सम्पादन तथा विशदीकरण भी किया है। व्याकरण के क्षेत्र में आपने नागेशभट्ट के 'ज्ञापक संग्रह' और उस पर उनकी स्वोपज्ञ वृत्ति 'विवृति' का समीक्षात्मक सम्पादन किया है तथा अपनी स्वोपज्ञटीकासहित *'ज्ञापकसंग्रहपरिशिष्ट'* नामक एक स्वतन्त्र ग्रन्थ का प्रणयन भी किया है। *'गोपालसहस्रनामस्तोत्र'* पर आपकी *'भगवद्‌गुणरत्नपेटिका'* नाम्नी टीका को भाष्य की संज्ञा दी जाये तो उचित होगा।

उपरिलिखित अनेक प्रौढ़ शास्त्रीय ग्रन्थों के प्रणेता प्रो॰ रामानुज ताताचार्य ने अपने सुदीर्घ सेवाकाल में अपने शिष्यों की एक महनीय परम्परा तैयार की है जो भारतवर्ष के विभिन्न विश्वविद्यालयों में अध्यापन-लेखनादि कार्यों के द्वारा आचार्यश्री की कीर्त्तिपताका को प्रथित कर रहे हैं।

II

'शाब्दबोधमीमांसा' नामक ग्रन्थ फ्रैंच इंस्टीट्यूट, पाण्डिचेरी द्वारा प्रकल्पित 'संस्कृत भाषा एवं साहित्य का भारतीय विश्लेषण' नामक बृहत्तर योजना के अन्तर्गत प्रकाश्य चार खण्डों में से सर्वप्रथम है। वर्ष २००५ में फ्रैंच इंस्टीट्यूट पाण्डिचेरी एवं राष्ट्रिय संस्कृत संस्थान के संयुक्त तत्त्वावधान में प्रकाशित ५४६ पृष्ठात्मक यह कृति न केवल आकृति में भव्य एवं आकर्षक है, अपितु अपने कथ्य की गहनता एवं व्यापकता के कारण प्रकृति में भी प्रतिष्ठित एवं प्रामाणिक है। शताधिक मूल शास्त्रीय संस्कृत ग्रन्थों के अध्ययन-आलोडन-शोधन के आधार पर इसमें शब्दप्रामाण्यविचार, शब्द-लक्षणविचार, वाक्य-वाक्यार्थस्वरूपविचार, स्फोटविचार, वाक्यार्थबोध-निमित्तविचार, अन्विताभिधानवाद-अभिहितान्वयवाद, वाक्यार्थबोध में मुख्यविशेष्यविचार, एकवाक्य-वाक्य-भेदादिविचार, आकाङ्क्षाविचार, योग्यताविचार, आसत्तिविचार तथा तात्पर्यविचार इन द्वादश अध्यायों के अन्तर्गत शाब्दबोध के विषय में भारतीय चिन्तन-विश्लेषण की एक विहङ्गम पूर्वपीठिका प्रस्तुत की गई है। ग्रन्थ की समाप्ति पर दी गई उदाहृत ग्रन्थों की सूची, उद्धृत ग्रन्थों एवं ग्रन्थकारों की नामानुक्रमणिका तथा विस्तृत सन्दर्भ सहिता विषयानुक्रमणिका से शोधार्थियों के लिए इसकी उपादेयता द्विगुणित हो गई है। ग्रन्थ के आरम्भ में दी गई विस्तृत भूमिका एवं उसका अंग्रेजी रूपान्तर इसके प्रयोजन, परिप्रेक्ष्य, पद्धति एवं प्रवृत्तियों का परिचय कराने में सर्वथा सफल रहे हैं—प्रस्तुत परिपत्र उसी का संक्षिप्त दिग्दर्शन कराने हेतु एक विनम्र प्रयास है।

III

भारतीय चिन्तन-परम्परा में शाब्दबोध का विवेचन अत्यन्त महत्त्वपूर्ण रहा है—पद, पदार्थ, वाक्य और वाक्यार्थ का विशद विश्लेषण इसी सन्दर्भ में किया गया है। व्याकरण, न्याय और मीमांसा दर्शनों में इन विषयों पर विस्तृत विचार किया गया है जो भारतीय भाषा-दर्शन को आत्मसात् करने के इच्छुक प्रत्येक अध्येता के लिए अमूल्य है। किन्तु एक तो इन शास्त्रीय ग्रन्थों की प्रौढ, प्रखर शैली और दूसरे इन विषयों की दुर्बोध, गहन प्रकृति के कारण आधुनिक काल में या तो इन विषयों का परिष्कृत ज्ञान केवल पारम्परिक संस्कृत विद्वानों तक सीमित रह गया है और या इनके प्रति प्रवृत्ति ही कम होती जा रही है। ऐसी परिस्थिति में प्रो॰ रामानुज ताताचार्य की प्रस्तुत कृति ने वस्तुतः एक श्लाघ्य पथ प्रशस्त किया है जो संस्कृत के क्षेत्र में समुपलब्ध शाब्दबोध सम्बन्धी गहन-गम्भीर विषयों का वर्तमाल काल में अध्ययन करने वाले विद्यार्थियों के लिए अतीव उपयोगी सिद्ध होगा।

उल्लेखनीय है कि भारतीय दर्शन में शब्दप्रमाण की सर्वोपरि प्रतिष्ठा एवं तत्सम्बन्धी प्रक्रिया का साङ्गोपाङ्ग विवेचन सभी आस्तिक सम्प्रदायों में विस्तारपूर्वक किया गया है तथा पदों के समूहरूप उन वाक्यों को ही शब्दप्रमाण कहा गया है, जिनसे हमें परोक्षविषयक ज्ञान मिलता है तथा जिन्हें हम आप्त साधनों से प्राप्त करते हैं। अतएव वाक्यात्मक शब्दजन्य बोध ही शाब्दबोध, वाक्यार्थ-बोध अथवा अन्वयबोध कहा जाता है। इसी शाब्दबोध के विचार को आधार बनाकर प्रस्तुत शाब्दबोधमीमांसा नामक ग्रन्थ लिखा गया है—

"तत्र वाक्यात्मकशब्दजन्यो बोधः शाब्दबोध इति, वाक्यार्थबोध अन्वयबोध इति च आख्यायते।" (भूमिका, पृ॰ १)

IV

शाब्दबोध के विषय में सर्वप्रथम शब्द-प्रामाण्य पर विचार किया गया है तथा वहाँ भी शब्द के अप्रामाण्य-निरासपूर्वक शब्द की पृथक् प्रमाणता सिद्ध की गई है। उल्लेखनीय है कि प्रत्यक्षप्रमाणमात्रवादी चार्वाक दार्शनिक शब्द और अनुमान को प्रमाण ही नहीं मानते किन्तु वे शब्द की प्रमाणता-खण्डन हेतु निम्न अनुमान का आश्रय लेते हैं–

विमतः शब्दः अप्रमाणं शब्दत्वात्, अप्रमाणत्वेन संप्रतिपन्नशब्दवत्।

किन्तु यहाँ प्रश्न उठ सकता है कि यदि प्रत्यक्षातिरिक्त किसी अन्य प्रमाण की सत्ता ही नहीं है तो फिर उक्त अनुमान ही कैसे स्वीकार्य होगा? अतः प्रतिपक्षी चार्वाक को या तो यह मानना चाहिए कि शब्द का प्रामाण्य है अथवा उक्त शब्दाप्रामाण्यसाधक अनुमान के निरस्त होने से अथवा यह मानना चाहिए कि अनुमान भी प्रमाण है (उक्त अनुमान के स्वीकृत होने से)। इन दोनों ही स्थितियों में प्रत्यक्षैकमात्रवाद बाधित होता है। अपि च, शब्द की अप्रमाणता का बोधक उक्त वचन किसी न किसी श्रोता को लक्ष्य में रखकर ही सार्थक होगा जो या तो शब्द की प्रमाणता के विषय में संशयग्रस्त है या विपर्यस्त है। किन्तु दूसरे व्यक्ति के संशय या विपर्यय का ज्ञान प्रत्यक्ष से तो होता नहीं, वह भी या तो अनुमान से साध्य होगा या किसी व्यक्ति द्वारा बोले गये शब्द से ही ज्ञेय होगा। अतः प्रत्यक्ष के अतिरिक्त अनुमान और शब्द की भी प्रमाणता तो स्वीकार करनी ही होगी।

न ही प्रतिपक्षी का यह कहना समीचीन है कि अनाप्त व्यक्ति द्वारा अनुक्त वाक्य प्रमाण है क्योंकि वहाँ न तो कारण-दोष देखे गये हैं और न ही बाधक ज्ञान। यहाँ भी प्रथम पक्ष तो स्वयं प्रतिपक्षी की मान्यता का ही विरोधी होगा क्योंकि वह तो शब्द को प्रमाण मानता ही नहीं और द्वितीय पक्ष से भी केवल यही सिद्ध होगा कि अनाप्त द्वारा अनुक्त वाक्य प्रमाण है न कि यह कि शब्द अप्रमाण है।

इस भाँति शब्द के अप्रामाण्य का निराकरण सर्वथा उपपन्न है।

V

बौद्ध एवं वैशेषिक दर्शन सम्प्रदायों को शब्द का प्रामाण्य तो अभिमत है किन्तु शब्द का पृथक् प्रमाणत्व स्वीकार्य नहीं, अतः वे शब्द का अन्तर्भाव अनुमान प्रमाण के अन्तर्गत ही करते हैं, तद्यथा–

शब्द पृथक् प्रमाण नहीं है, क्योंकि वह अनुमान की रीति से ही अर्थ का प्रत्यायक होता है। जैसे प्रत्यक्ष के द्वारा न जाना जाता हुआ साध्य, जाने गये लिङ्ग के द्वारा, बाद में होने वाले अनुमान के स्थल पर जाना जाता है–उसी प्रकार जाने गये शब्द के द्वारा, बाद में उस अर्थ का ज्ञान

होता है जो प्रत्यक्षादि के द्वारा नहीं जाना जा सकता। इस भाँति शब्द भी लिङ्ग के द्वारा ही अर्थ का बोधक होने से (अनुमान ही है, उससे पृथक् प्रमाण नहीं)।

अपि च, पूर्वपक्ष (बौद्ध तथा वैशेषिक) की ओर से कहा जा सकता है कि यदि दो प्रमाण एक-दूसरे से पृथक् होते हैं तो उनके द्वारा बोधित कराये जाने वाले ज्ञान में भी पार्थक्य होता है जैसे प्रत्यक्ष और अनुमान, तथा अनुमान और उपमान के द्वारा होने वाला वह्निरूपी साध्य का ज्ञान धूमरूपी लिङ्ग से-इसी भाँति उपमान के स्थल पर सादृश्यज्ञान से अर्थ-प्रतीत होती है किन्तु अनुमान के स्थल पर ऐसा नहीं देखा जाता। अतः प्रमाणों की प्रवृत्ति के भेद से प्रमाणों का भेद सिद्ध होता है। किन्तु शब्द और अनुमान में इस प्रकार का प्रवृत्तिभेद नहीं पाया जाता क्योंकि जाने हुए शब्द से ही अर्थ की प्रतीति होती है तथा जाने हुए लिङ्ग से ही अर्थ (साध्य) की सिद्धि होती है। अतः पूर्वपक्ष के अनुसार यह कहा जाना उचित है कि शब्द कोई पृथक् प्रमाण नहीं, अनुमान ही है।

इसके अतिरिक्त, पूर्वपक्ष का यह भी तर्क है कि अनुमान के स्थल पर सम्बद्ध होने वाले हेतु और साध्य के मध्य सम्बन्ध की स्मृति हेतु को देखने के अनन्तर होती है तथा उसके पश्चात् ही साध्य की प्रतीति होती है। उसी प्रकार शब्द प्रमाण के स्थल पर भी सम्बद्ध होने वाले शब्द और अर्थ के मध्य सम्बन्ध की स्मृति शब्दविषयक श्रावण प्रत्यक्ष के अनन्तर होती है तथा उस सम्बन्ध की स्मृति के उपरान्त ही अर्थ की प्रतीति होती है। अतः शब्द अनुमान से पृथक् प्रमाण नहीं है।

सिद्धान्त पक्ष (न्यायदर्शन)

उक्त रीति से पूर्वपक्ष का उपस्थापन करने के अनन्तर न्यायसूत्रकार गौतम ने शब्द की पृथक् प्रमाणता सिद्ध करने से पूर्व उक्त आक्षेपों का निराकरण करते हुए प्रतिपादित किया है कि स्वर्ग, अप्सरायें, उत्तर कुरु, सप्तद्वीप आदि पदार्थ-जो प्रत्यक्ष से नहीं जाने जा सकते, उनका ज्ञान केवल शब्द से भी नहीं हो सकता। अपितु 'यह शब्द आप्त जनों द्वारा उक्त है' इस रीति से शब्द की आप्तोक्तता का ज्ञान होने पर ही उक्त विषयों का समीचीन बोध हो सकता है जबकि अनुमान के स्थल पर इस प्रकार की प्रवृत्ति नहीं देखी जाती। अतएव प्रवृत्ति-भेद के आधार पर भी यही सिद्ध होता है कि शब्द अनुमान से भिन्न, पृथक् प्रमाण है।

अपि च, शब्द और अर्थ के मध्य एक निश्चित सम्बन्ध स्वीकार किया जाता है-वह सम्बन्ध प्राप्तिरूप संयोग सम्बन्ध नहीं हो सकता क्योंकि संयोग तो दो सहभावी किन्तु अप्राप्त वस्तुओं के मध्य होता है जैसे घट और पट। जबकि शब्द और अर्थ साथ-साथ नहीं रहते। इसी भाँति संयोग सम्बन्ध दो ऐसे तत्त्वों के मध्य होता है जो इन्द्रिय-ग्राह्य होते हैं, जबकि शब्द के श्रोत्रेन्द्रियग्राह्य होने पर भी अर्थ (या विषय) सदा इन्द्रियगम्य नहीं होता। न ही, शब्द-अर्थ के मध्य समवाय सम्बन्ध सम्भव है-इन दोनों के बीच तो एक विशिष्ट शक्ति या समयरूपी सम्बन्ध ही माना जाता है।

इसके विपरीत, अनुमान के स्थल पर अर्थ-प्रतीति इस समय रूपी सम्बन्ध के आधार पर नहीं होती, अपितु अविनाभाव या व्याप्ति के आधार पर होती है। अतः प्रवृत्ति-भेद के कारण यह सिद्ध हो जाता है कि शब्द एक पृथक् प्रमाण है, अनुमान के अन्तर्गत उसका समावेश नहीं किया जा सकता।

दिङ्नागमत खण्डन

इस स्थल पर ग्रन्थकार ने न्यायसूत्रकार के मतानुसार शब्द की पृथक् प्रमाणता सिद्ध करने के उपरान्त उद्योतकरविरचित **'आप्तोपदेशः शब्दः'** (न्या॰ सू॰ १/१/७) पर वात्स्यायन भाष्य की व्याख्या के अवसर पर **न्यायवार्त्तिक** और वाचस्पति मिश्र प्रणीत **न्यायवार्त्तिकतात्पर्यटीका** के आधार पर शब्द का अनुमान में अन्तर्भाव प्रतिपादित करने वाले बौद्ध दार्शनिक दिङ्नाग का मत पूर्वपक्ष के रूप में इस भाँति प्रस्तुत किया है–

दिङ्नाग का आक्षेप है कि यदि ऐसा माना जाये कि कोई शब्द सीधे अपने अर्थ का ज्ञान कराता है तो शब्द और अर्थ के मध्य कोई सम्बन्ध होना चाहिए। अन्यथा प्रत्येक शब्द से प्रत्येक अर्थ की प्रतीति होने लगेगी। किन्तु शब्द और अर्थ के मध्य कोई सम्बन्ध सिद्ध नहीं हो सकता–तादात्म्य सम्बन्ध वहाँ नहीं माना जा सकता क्योंकि शब्द अर्थ से अभिन्न नहीं है। न ही, वहाँ शब्द और अर्थ के मध्य कार्य-कारण-सम्बन्ध माना जा सकता है क्योंकि शब्द अर्थ का कार्य नहीं है, अपितु अर्थ के विना भी, वक्ता की विवक्षा मात्र से शब्द की उत्पत्ति देखी जाती है। अतः यही मानना समीचीन है कि शब्द से अर्थ की प्रतीति साक्षात् नहीं, अपितु परम्परया होती है, तद्यथा–वक्ता के अभिप्रायानुसार उसकी विवक्षा होती है, और उसका अभिप्राय कभी तो मात्र मानसिक होता है और कभी उस विषय के वास्तविक ज्ञान पर आधारित होता है। अतः जो कोई विवक्षित विषय को कहता है अथवा प्रमाणों द्वारा विनिश्चित विषय का उच्चारण करता है, वही आप्त है। उसके वचनरूपी कार्य से विवक्षारूपी कारण का अनुमान होता है। फिर उस विवक्षा से उसके कारणभूत विषय (अर्थ) का ज्ञान अनुमित होता है। इस अर्थज्ञान से उसके कारणभूत अर्थ का अनुमान होता है चूँकि अर्थ का ज्ञान अर्थ से जन्य होता है। इस प्रकार, उक्त कारण परम्परा के आधार पर शब्द अर्थ का अनुमापक सिद्ध होता है और अनुमान से पृथक् उसकी प्रमाणता नहीं ठहरती।

सिद्धान्तमत

दिङ्नाग के उक्त मत का खण्डन करते हुए न्यायवर्त्तिककार एवं तात्पर्यटीकाकार कहते हैं कि–**इदं मतं न युक्तम्**। (भूमिका पृ॰ ४) यदि यह माना जाये कि शब्द अर्थ की साक्षात् प्रतीति नहीं कराता, अपितु केवल ज्ञान का अनुमान कराता है, तब तो कोई विशेष अर्थ सिद्ध ही न हो सकेगा। दिङ्नाग की मान्यता है कि उस ज्ञानविशेष से ही अर्थविशेष की सिद्धि हो जायेगी, किन्तु यह सर्वथा अनुचित एवं अस्वीकार्य है क्योंकि ज्ञान में अपने अर्थ के अतिरिक्त और कोई विशेष

होता ही नहीं। अतः यही मानना संगत है कि वक्ता शब्द के उच्चारण से पूर्व, उस शब्द के द्वारा ही, वाक्य के अर्थ का ज्ञान रखता है–

"तस्मात् वक्तृज्ञानविशेषणाय पूर्वं शब्दादेव केवलात् वाक्यार्थज्ञानमेषितव्यम्।" (भूमिका, पृ० ४)

अन्य शब्दों में, कहा जा सकता है कि पहले पदों का समूह या वाक्य, जिसका प्रत्यायक सम्बन्ध अपने-अपने अर्थों के साथ पहले से विदित है, अर्थों को स्मरण कराते हैं और फिर आकांक्षा, योग्यता और आसत्ति से सहकृत होकर वे पद या शब्द ही पहले से न जाने गये वाक्यार्थ का बोध कराते हैं–यहाँ तक कि वे पद अपने-अपने पदार्थ और सभी पदों के समूह रूप वाक्य द्वारा बोधित वाक्यार्थ के मध्य संगतिग्रहण की भी प्रतीक्षा नहीं करते, फिर अनुमान की तो बात ही क्या?

"एवं च कृतं वक्तृज्ञानानुमानेनार्थप्रतिपत्त्यर्थेन! तस्मात् पदानि कृतसङ्केतानि स्वार्थान् स्मारयन्ति, आकांक्षायोग्यतासत्तिसहकृतानि अदृष्टपूर्वं वाक्यार्थं बोधयन्ति, न संगतिग्रहणमपि प्रतीक्षन्त इति दूरेऽनुमानात्।"

इस प्रकार उक्त रीति से 'समान प्रवृत्ति वाला होने से शब्द अनुमान ही है' तथा 'विवक्षा के अनुमान द्वारा शब्द अर्थ का अनुमापक होता है'–दिङ्नाग द्वारा उपस्थापित ये दोनों तर्क निरस्त हो जाते हैं। अब इसी क्रम में वैशेषिक सूत्रकार कणाद का मत पूर्वपक्ष के रूप में उपन्यस्त करते हुए ग्रन्थकार का कथन है कि **'एतेन शाब्दं व्याख्यातम्'** (वै० सू० ९.२.३) इस सूत्र में कणाद शब्द को अनुमान में ही समाविष्ट करते हैं। उन्होंने इससे पहले एक सूत्र में अनुमान की परिभाषा दी जो निम्नलिखित है–

अस्येद कारणं कार्यं सम्बन्धि एकार्थसमवायि विरोधि चेति लैङ्गिकम्।

(वै० सू० ९.२.१)

अर्थात् कार्य-हेतु (जैसे वह्न्यनुमान में धूम), कारणहेतु (जैसे बधिरकर्तृक शब्दानुमिति में भेरीदण्डसंयोग), संयोगि-हेतु (जैसे त्वगिन्द्रियानुमान में शरीर), विरोधिहेतु (जैसे आवरणान्तर्गत नकुलानुमान में सर्प-विस्फूर्जन) और समवायिहेतु (जैसे-तेजानुमान में जलगत उष्णता) के ज्ञान से 'इस हेतु का यह साध्य है' इस प्रकार का ज्ञान अनुमिति कहलाता है।

तदुपरान्त यह प्रतिपादित किया है कि अनुमान की उक्त प्रक्रिया से ही शब्द की भी व्याख्या हो जाती है, अतः शब्द को पृथक् प्रमाण नहीं माना जा सकता। वैशेषिक सूत्रों के भाष्यकार प्रशस्तपाद ने भी मत व्यक्त किया है कि शब्द अनुमान से भिन्न अतिरिक्त प्रमाण नहीं क्योंकि शब्द द्वारा अर्थावबोधन की प्रक्रिया वैसी ही है जैसी लिङ्ग द्वारा साध्य के साधन की–

"शब्दादीनामप्यनुमानेऽन्तर्भावः, समानविधित्वात्। यथा प्रसिद्धसमयस्याऽसन्दिग्ध-लिङ्गदर्शनप्रसिद्ध्यनुस्मरणाभ्यामतीन्द्रियेऽर्थे भवत्यनुमानमेवं शब्देऽपि।" (प्र॰पा॰भा॰, पृ॰ ५/२)

अभिप्राय यह है कि शब्द तब तक अपने अर्थ का बोध नहीं कर सकता जब तक यह निश्चित रूप से ज्ञात न हो कि किसी विशेष शब्द का कोई विशेष अर्थ होता है। अतः चूँकि शब्द अर्थ के साथ अपने अव्यभिचरित सम्बन्ध-ज्ञान के पश्चात् ही अर्थ का बोध कराता है, अतः जैसे धूम से अग्नि के अनुमान में धूम लिङ्ग और अग्नि साध्य होती है, वैसे ही शब्द से अर्थ के ज्ञान में शब्द लिङ्ग और अर्थ साध्य होता है। इसीलिए शब्द पृथक् प्रमाण नहीं, अनुमान ही है–

"तावद्धि शब्दो नार्थं प्रतिपादयति, यावत् 'अयं शब्दः अस्यार्थस्याव्यभिचारी इत्येवं नावगम्यते। ज्ञाते त्वव्यभिचारे अर्थं प्रतिपादयन् शब्दः धूम इव लिङ्गं स्यादिति तदाशयः।" (भूमिका, पृ॰ ५)

वैशेषिक मत-निरसन

इसी भाँति न्यायलीलावतीकार वल्लभाचार्य ने भी अपने ग्रन्थ में प्रतिपादित किया है कि शब्द अनुमान से पृथक् प्रमाण नहीं–

एतानि पदानि स्मरितार्थसंसर्गज्ञानपूर्वकाणि संसृष्टार्थपरत्वात्।

अर्थात् सभी (वैदिक एवं लौकिक) पद पहले से स्मरण कराये गये विषयों के संसर्ग-ज्ञान से युक्त होते हैं क्योंकि पदों के प्रयोग से पूर्व उनके प्रयोक्ता आप्त पुरुष अथवा परमेश्वर में उन पदों के अर्थों का परस्पर संसृष्ट-विषयक ज्ञान अवश्य रहता है। तत्त्वचिन्तामणिकार गंगेश उपाध्याय ने उक्त वैशेषिकानुसारी मत को अपने ग्रन्थ में विस्तारपूर्वक उद्धृत किया है और फिर न्यायमतानुसार उसका खण्डन किया है जो प्रस्तुत ग्रन्थ 'शाब्दबोधमीमांसा' प्रथम भाग में यथास्थल प्रदर्शित किया गया है (पृ॰ ११-१२)।

न्यायमञ्जरीकार जयन्तभट्ट ने भी वैशेषिक के उक्त तर्कों की सयुक्तिक समीक्षा करते हुए सिद्ध किया है कि शब्द अनुमान से पृथक् एक स्वतन्त्र प्रमाण है। उन्होंने प्रथमतः शब्द को दो प्रकार का माना है–पद और वाक्य। इनमें से वाक्य अपने अर्थ का बोध कराने में किसी सम्बन्ध पर आश्रित नहीं होता, क्योंकि वाक्य में शक्ति नहीं होती। किसी नूतन व्यक्ति द्वारा प्रथमतः प्रणीत श्लोकों को सुनते ही पदों से परिचित श्रोताओं को वाक्यार्थ-बोध होता देखा जाता है। इसलिए सम्बन्धज्ञान के आधार पर प्रवृत्त होने वाले अनुमान से वाक्य की समानता कथमपि सिद्ध नहीं की जा सकती।

जहाँ तक पद का प्रश्न है, यद्यपि उसकी अर्थ में प्रवृत्ति तो सम्बन्ध-ज्ञान की अपेक्षा से ही होती है, तथापि विषय-भेद और सामग्री-भेद के कारण वह अनुमान से तो भिन्न ही है। शब्दों से अर्थ की प्रतीति उनकी अर्थबोधक शक्ति के आधार पर होती है अवश्य, किन्तु शब्द से अर्थ की प्रतीति और हेतु से साध्य की प्रतीति समान नहीं कही जा सकती। पद से बोध्य अर्थ मात्र एक

जातिविशिष्ट व्यक्ति का ज्ञान कराता है जबकि अनुमान में हेतु से जो ज्ञान उत्पन्न होता है, वह मात्र इतना वाक्यार्थ बोध कराता है कि–'यहाँ अग्नि है अथवा पर्वत पर अग्नि है'-

जातिविशिष्टव्यक्तिमात्रं पदस्यार्थः। अनुमानं तु वाक्यार्थविषयकम्।

(भूमिका, पृ॰ ५)

अपि च, अनुमान में पर्वतादिरूपी जो विशेष्य है, उसका ज्ञान होने पर ही, धूमादि लिङ्ग के द्वारा अग्न्यादि विशेषण का ज्ञान होता है जबकि शब्द प्रमाण के स्थल पर पद से पहले घटरूपी विशेष्य का बोध होता है। अतः स्पष्ट है कि शाब्द-बोध जन्य विषय भिन्न होता है और हेतुजन्य अनुमान का विषय भिन्न होता है, इसलिए शब्द अनुमान से पृथक् है–

"किञ्च पर्वतादिरूपं यद्विशेष्यं तज्ज्ञानपूर्वकम् अग्न्यादिविशेषणज्ञानं लिङ्गादुदेति। पदात्तु विशेषणावगतिपूर्विका विशेष्यावगतिरिति विषयभेदः।" (भूमिका, पृ॰ ५)

